# माण्डूक्यकारिका

# अलातशान्तिप्रकरणम्

ओंकार-निर्णय-द्वारेण आगमतः प्रतिज्ञातस्याद्वैतस्य बाह्य-विषय-भेद-वैतथ्याच्च सिद्धस्य पुनरद्वैते शास्त्र-युक्तिभ्यां

साक्षान्निर्धारितस्य एतदुत्तमं सत्यमित्युपसंहारः कृतः।

अन्ते तस्यैतस्यागमार्थस्य अद्वैत-दर्शनस्य प्रतिपक्ष-भूता द्वैतिनो वैनाशिकाश्च तेषां चान्योन्य-विरोधाद्राग-द्वेषादि-

क्लेशास्पदं दर्शनमिति मिथ्या-दर्शनत्वं सूचितम्।

क्लेशानास्पदत्वात् सम्यग्दर्शनमित्यद्वैत-दर्शनं स्तुतये।

तदिह विस्तरेणान्योन्य-विरुद्धतया असम्यग्दर्शनत्वं प्रदर्श्य तत्प्रतिषेधेन अद्वैत-दर्शन-सिद्धिरुपसंहर्तव्या आवीत-

न्यायेन इत्यलात-शान्तिरारभ्यते।

तत्राद्वैत-दर्शन-सम्प्रदाय-कर्तुरद्वैत-स्वरूपेण एव नमस्कारार्थोऽयमाद्य श्लोकः।

आचार्य-पूजा हि अभिप्रेतार्थ-सिद्ध्यर्थेष्यते शास्त्रारम्भे -

**ज्ञानेनाकाशकल्पेन धर्मान्यो गगनोपमान् ।**

**ज्ञेयाभिन्नेन सम्बुद्धस्तं वन्दे द्विपदां वरम् ।। ४.१ ।।**

यः आकाशकल्पेन ज्ञेयाभिन्नेन ज्ञानेन गगनोपमान् धर्मान् संबुद्धः तं द्विपदां वरं वन्दे ।। १।।

आकाशेन ईषदसमाप्तमाकाश-कल्पम्। आकाश-तुल्यमित्येतत्। तेन **आकाशकल्पेन ज्ञानेन**।

किम् **धर्मान्** आत्मनः।

किंविशिष्टान् **गगनोपमान्** गगनमुपमा येषां ते गगनोपमाः, तानात्मनो धर्मान्।

ज्ञानस्यैव पुनर्विशेषणम् - ज्ञेयैर्धर्मैरात्मभिरभिन्नम् अग्न्युष्णवत् सवितृ-प्रकाशवत् च यद् ज्ञानम्,

तेन **ज्ञेयाभिन्नेन** ज्ञानेन आकाश-कल्पेन ज्ञेयात्म-स्वरूपाव्यतिरिक्तेन, गगनोपमान्धर्मान् **यः** **सम्बुद्धः** सम्बुद्धवानिति।

अयमेव ईश्वरो यो नारायणाख्यः, **तं वन्दे** अभिवादये।

**द्विपदां वरं** द्विपदोपलक्षितानां पुरुषाणां वरं प्रधानम्। पुरुषोत्तममित्यभिप्रायः।

उपदेष्टृ-नमस्कार-मुखेन ज्ञान-ज्ञेय-ज्ञातृ-भेद-रहितं परमार्थ-तत्त्व-दर्शनमिह प्रकरणे प्रतिपिपादयिषितं प्रतिपक्ष-

प्रतिषेध-द्वारेण प्रतिज्ञातं भवति।। ४.१ ।।

अधुना अद्वैत-दर्शन-योगस्य नमस्कारः तत्स्तुतये -

**अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः ।**

**अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहम् ।। ४.२ ।।**

अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः अविवादोऽविरुद्धश्च (भवति।) (यः योगः) देशितस्तं (योगं) अहम् नमामि ।। २।।

स्पर्शनं स्पर्शः सम्बन्धो न विद्यते यस्य योगस्य केनचित्कदाचिदपि, सः **अस्पर्शयोगः** ब्रह्म-स्वभाव एव,

वै नाम् इति। ब्रह्म-विदामस्पर्श-योग इत्येवं प्रसिद्ध इत्यर्थः। स च **सर्वसत्त्वसुखो** भवति।

कश्चिदत्यन्त-सुख-साधन-विशिष्टोऽपि दुःख-रूपः, यथा तपः। अयं तु न तथा। किं तर्हि सर्व-सत्त्वानां सुखः।

तथा इह भवति कश्चिद्विषयोपभोगः सुखो न हितः। अयं तु सुखो **हितः** च। नित्यमप्रचलित-स्वभावत्वात्।

किञ्च **अविवादः** विरुद्ध-वदनं विवादः पक्ष-प्रतिपक्ष-परिग्रहेण यस्मिन् न विद्यते सः अविवादः।

कस्मात् यतः **अविरुद्धः** **च**। य ईदृशो योगः **देशितः** उपदिष्टः शास्त्रेण, **तं** **नमाम्यहं** प्रणमामीत्यर्थः।। ४.२।।

कथं द्वैतिनः परस्परं विरुध्यन्ते इत्युच्यते -

**भूतस्य जातिमिच्छन्ति वादिनः केचिदेव हि ।**

**अभूतस्यापरे धीरा विवदन्तः परस्परम् ।। ४.३ ।।**

परस्परं विवदन्तः सन्तः केचिद् एव वादिनः हि भूतस्य जातिमिच्छन्ति । अपरे धीराः अभूतस्य (जातिमिच्छन्ति) ।। ३।।

**भूतस्य** विद्यमानस्य वस्तुनः **जातिम्** उत्पत्तिम् **इच्छन्ति** **वादिनः** **केचिदेव** **हि** साङ्ख्याः।

न सर्व एव द्वैतिनः। यस्माद् **अभूतस्य** अविद्यमानस्य **अपरे** वैशेषिकाः नैयायिकाश्च **धीराः** धीमन्तः।

प्राज्ञाभिमानिन इत्यर्थः।

**विवदन्तः** विरुद्धं वदन्तो हि अन्योन्यमिच्छन्ति जेतुमित्यभिप्रायः।। ४.३ ।।

तैरेवं विरुद्ध-वदनेन अन्योन्य-पक्ष-प्रतिषेधं कुर्वद्भिः किं ख्यापितं भवति इत्युच्यते -

**भूतं न जायते किञ्चिदभूतं नैव जायते ।**

**विवदन्तोऽद्वया ह्येवमजातिं ख्यापयन्ति ते ।। ४.४ ।।**

किंचिद् भूतं न जायते। (किंचिद्) अभूतं नैव जायते। एवं विवदन्तः (सन्तः) ते द्वयाः (द्वैतिनः) {अद्वयाः इत्यपि पाठः अस्ति}अजातिं हि ख्यापयन्ति ।। ४।।

**भूतं** विद्यमानं वस्तु **न** **जायते** **किञ्चिद्** विद्यमानत्वादेव आत्मवद् इत्येवं वदन् असद्वादी साङ्ख्य-पक्षं प्रतिषेधति सज्जन्म। तथा **अभूतम्** अविद्यमानम् अविद्यमानत्वाद् **नैव** **जायते** शश-विषाणवद् इत्येवं वदन् साङ्ख्योऽपि असद्वादि-पक्षम् असज्जन्म प्रतिषेधति। **विवदन्तः** विरुद्धं वदन्तः **अद्वयाः** अद्वैतिनो **हि** एते अन्योन्यस्य पक्षौ सदसतोर्जन्मनी प्रतिषेधन्तः **अजातिम्** अनुत्पत्तिमर्थात् **ख्यापयन्ति** प्रकाशयन्ति **ते**।। ४.४ ।।

**ख्याप्यमानामजातिं तैरनुमोदामहे वयम् ।**

**विवदामो न तैः सार्धमविवादं निबोधते ।। ४.५ ।।**

तैः ख्याप्यमानामजातिं वयम् अनुमोदामहे। तैस्सार्धं न विवदामः। (तमस्पर्शयोगम्) अविवादं निबोधत।।५।।

**तैः** एवं **ख्यप्यमानामजातिम्** एवमस्तु इति **अनुमोदामहे** केवलम्।

न तैः सार्धं विवदामः पक्ष-प्रतिपक्ष-ग्रहणेन। यथा ते अन्योन्यमित्यभिप्रायः।

अतः तम् **अविवादं** विवाद-रहितं परमार्थ-दर्शनमनुज्ञातमस्माभिः **निबोधत** हे शिष्याः।। ४.५ ।।

**अजातस्यैव धर्मस्य जातिमिच्छन्ति वादिनः ।**

**अजातो ह्यमृतो धर्मो मर्त्यतां कथमेष्यति ।। ४.६ ।।**

वादिनःअजातस्यैव धर्मस्य जातिमिच्छन्ति  अजातो अमृतो धर्मः हि कथं मर्त्यताम् एष्यति।। ६।।

सदसद्वादिनः सर्वेऽपीति। अयं तु पुरस्तात्कृतभाष्यः श्लोकः।। ४.६ ।।

**न भवत्यमृतं मर्त्यं न मर्त्यममृतं तथा ।**

**प्रकृतेरन्यथाभावो न कथञ्चिद् भविष्यति ।। ४.७ ।।**

अमृतं मर्त्यं न भवति। तथा मर्त्यममृतं न (भवति)। प्रकृतेरन्यथाभावः कथञ्चिद् न भविष्यति।। ७।।

**स्वभावेनामृतो यस्य धर्मो गच्छति मर्त्यताम् ।**

**कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः ।। ४.८ ।।**

यस्य (वादिनः) अमृतः धर्मः स्वभावेन मर्त्यतां गच्छति तस्य कृतकेन (हेतुना) अमृतः कथं निश्चलः स्थास्यति ।। ८।।

उक्तार्थानां श्लोकानाम् इहोपन्यासः परवादि-पक्षाणामन्योन्य-विरोध-ख्यापितानुमोदन-प्रदर्शनार्थः।। ४.७-८ ।।

यस्माद् लौकिक्यपि प्रकृतिर्न विपर्येति। कासावित्याह -

**सांसिद्धिकी स्वाभाविकी सहजा अकृता च या ।**

**प्रकृतिः सेति विज्ञेया स्वभावं न जहाति या ।। ४.९ ।।**

या सांसिद्धिकी स्वाभाविकी सहजा अकृता च, या स्वभावं न जहाति सा प्रकृतिः इति विज्ञेया ।। ९ ।।

सम्यक् सिद्धिः संसिद्धिः, तत्र भवा **सांसिद्धिकी**।

यथा योगिनां सिद्धानामणिमाद्यैश्वर्य-प्राप्तिः प्रकृतिः सा भूत-भविष्यत्कालयोरपि योगिनां न विपर्येति,

तथैव सा। तथा **स्वाभाविकी** द्रव्य-स्वभावत एव (सिद्धा), यथा अग्न्यादीनामुष्ण-प्रकाशादि-लक्षणा।

सापि च कालान्तरे व्यभिचरति देशान्तरे वा। तथा **सहजा** आत्मना सहैव जाता।

यथा पक्ष्यादीनामाकाश-गमनादि-लक्षणा।

अन्यापि या काचिद् **अकृता** केनचिन्न कृता।

यथा अपां निम्न-देश-गमनादि-लक्षणा।

अन्यापि **या** काचित् **स्वभावं** **न** **जहाति**, **सा** सर्वा **प्रकृतिः** **इति** **विज्ञेया** लोके।

मिथ्या-कल्पितेषु लौकिकेष्वपि वस्तुषु प्रकृतिर्नान्यथा भवति।

किमुत अज-स्वभावेषु परमार्थ-वस्तुषु अमृतत्व-लक्षणा प्रकृतिर्नान्यथा भवति इत्यभिप्रायः।। ४.९ ।।

किंविषया पुनः सा प्रकृतिः यस्या अन्यथाभावो वादिभिः कल्प्यते, कल्पनायां वा को दोषः इत्याह -

**जरामरणनिर्मुक्ताः सर्वे धर्माः स्वभावतः ।**

**जरामरणमिच्छन्तः च्यवन्ते तन्मनीषया ।। ४.१० ।।**

सर्वे धर्माः स्वभावतः जरामरणनिर्मुक्ताः (भवन्ति)। (एवं-स्वभावाः सन्तः ते धर्माः) जरामरणमिच्छन्तः (सन्तः) (इव) तन्मनीषया च्यवन्ते।। १०।।

**जरा-मरण-निर्मुक्ताः** जरा-मरणादि-सर्व-विक्रिया-वर्जिता इत्यर्थः।

के **सर्वे** **धर्माः** सर्वे आत्मानः इत्येतत्। **स्वभावतः** प्रकृतितः।

एवं-स्वभावाः सन्तो धर्माः **जरा-मरणमिच्छन्तः** इच्छन्त इव इच्छन्तः रज्ज्वाम् इव सर्पमात्मनि कल्पयन्तः

**च्यवन्ते**, स्वभावतः चलन्तीत्यर्थः।

**तन्मनीषया** जरा-मरण-चिन्तया तद्भाव-भावितत्व-दोषेण इत्यर्थः:।। ४.१० ।।

कथं सञ्जाति-वादिभिः साङ्ख्यैरनुपपन्नमुच्यते इति, आह वैशेषिकः -

**कारणं यस्य वै कार्यं कारणं तस्य जायते ।**

**जायमानं कथमजं भिन्नं नित्यं कथं च तत् ।। ४.११ ।।**

यस्य वै कारणं कार्यं (भवति) तस्य कारणं जायते। (कार्यरूपेण) जायमानं (कारणं प्रधानं) कथमजं (भवति)। (कार्याकारेण) भिन्नं (स्फुटितं, विकृतं) च तत् (कारणम्) कथं नित्यं (भवेत्)।। ११।।

**कारणं** मृद्वद् उपादान-लक्षणं **यस्य** वादिनः **वै** **कार्यम्**, कारणमेव कार्याकारेण परिणमते यस्य वादिन इत्यर्थः।

**तस्य** अजमेव सत् प्रधानादि **कारणं** महदादि-कार्य-रूपेण **जायते** इत्यर्थः।

महदाद्यकारेण चेद् **जायमानं** प्रधानम्, **कथमजम्** उच्यते तैः विप्रतिषिद्धं चेदम् - जायते अजं चेति।

नित्यं च तैरुच्यते। प्रधानं **भिन्नं** विदीर्णं स्फुटितमेकदेशेन सत् **कथं** **नित्यं** भवेदित्यर्थः।

न हि सावयवं घटादि एकदेशेन स्फुटन-धर्मि नित्यं दृष्टं लोके इत्यर्थः।

विदीर्णं च स्यादेकदेशेनाजं नित्यं चेत्येतद् विप्रतिषिद्धं तैरभिधीयत इत्यभिप्रायः।। ४.११ ।।

उक्तस्यैवार्थस्य स्पष्टीकरणार्थमाह -

**कारणाद् यद्यनन्यत्वमतः कार्यमजं यदि ।**

**जायमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवम् ।। ४.१२ ।।**

यदि (कार्यस्य) कारणाद् अनन्यत्वम् (भवति) अतः (तर्हि) कार्यं अजं (भवति) यदि हि वै जायमानात् कार्यात् कारणं (अनन्यत् भवति) (तर्हि) ते (तव) (कारणं) कथं ध्रुवम् (भवति)।। १२।।

**कारणाद्** अजात् कार्यस्य **यदि** **अनन्यत्वम्** इष्टं त्वया, ततः **कार्यम्** (अपि) **अजम्** इति प्राप्तम्।

इदं चान्यद्विप्रतिषिद्धं - कार्यमजं चेति **तव**। किञ्चान्यत्।

कार्यकारणयोरनन्यत्वे **जायमानाद्धि** **वै** **कार्यात्** **कारणम्** अनन्यद् नित्यं **ध्रुवं** च **ते** **कथं** भवेत्

न हि कुक्कुट्या एकदेशः पच्यते, एकदेशः प्रसवाय कल्प्यतेः।। ४.१२ ।।

**अजाद्वै जायते यस्य दृष्टान्तस्तस्य नास्ति वै ।**

**जाताच्च जायमानस्य न व्यवस्था प्रसज्यते ।। ४.१३ ।।**

यस्य वै अजाद् (कार्यं) जायते तस्य वै दृष्टान्तः नास्ति । जाताच्च जायमानस्य (अभ्युपगमे सति) व्यवस्था न प्रसज्यते।। १३।।

किञ्चान्यत्। यद् **अजाद्** अनुत्पन्नाद्वस्तुनः **जायते** **यस्य** वादिनः कार्यम्, **दृष्टान्तः** **तस्य** **नास्ति** **वै**।

दृष्टान्ताभावे अर्थादजान्न किञ्चिज्जायते इति सिद्धं भवतीत्यर्थः।

यदा पुनः **जाताद्** **जायमानस्य** वस्तुनः अभ्युपगमः, तदपि अन्यस्माज्जातात्, तदप्यन्यस्मादिति न व्यवस्था

प्रसज्यते। अनवस्थानं स्यादित्यर्थः।। ४.१३ ।।

यत्र त्वस्य सर्वमात्मैवाभूत् (बृ. २.४.१४) इति परमार्थतो द्वैताभावः श्रुत्योक्तः। तमाश्रित्याह -

**हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।**

**हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते ।। ४.१४ ।।**

येषां (पूर्वपक्षिणां मते) हेतोः आदिः फलं (भवति) फलस्य च आदिः हेतुः (भवति) तैः हेतोः फलस्य च अनादिः कथं (आक्षेपार्थे) उपवर्ण्यते।।१४।।

**हेतोः** धर्माधर्मादेः **आदिः** कारणं देहादि-सङ्घातः **फलं** येषां वादिनाम्।

तथा **आदिः** कारणं **हेतुः** धर्माधर्मादिः **फलस्य** **च** देहादि-सङ्घातस्य।

एवं हेतु-फलयोरितरेतर-कार्य-कारणत्वेन आदिमत्त्वं ब्रुवद्भिः एवं **हेतोः** **फलस्य** **च** **अनादि**त्वं **कथं तैरुपवर्ण्यते**

विप्रतिषिद्धमित्यर्थः।

न हि नित्यस्य कूटस्थस्यात्मनो हेतुफलात्मता सम्भवति।। ४.१४ ।।

कथं तैर्विरुद्धमभ्युपगम्यते इत्युच्यते -

**हेतोरादिः फलं येषामादिर्हेतुः फलस्य च ।**

**तथा जन्म भवेत्तेषां पुत्राज्जन्म पितुर्यथा ।। ४.१५ ।।**

येषां (पूर्वपक्षिणां मते) हेतोः आदिः फलं (भवति), फलस्य च आदिः हेतुः (भवति), तेषां यथा पुत्रात् पितुः जन्म (भवति) तथा (फलाद् हेतोः) जन्म भवेत् ।। १५।।

हेतुजन्यादेव फलाद् हेतोर्जन्माभ्युपगच्छतां **तेषाम्** ईदृशो विरोध उक्तो भवति, **यथा** **पुत्राज्जन्म** **पितुः**।।४.१५।।

यथोक्तो विरोधो न युक्तोऽभ्युपगन्तुमिति चेन्मन्यसे -

**सम्भवे हेतुफलयोरेषितव्यः क्रमस्त्वया ।**

**युगपत्सम्भवे यस्मादसम्बन्धो विषाणवत् ।। ४.१६ ।।**

हेतुफलयोः संभवे (सति) क्रमः त्वया एषितव्यः। युगपत्संभवे यस्माद् (हेतुफलयोः कार्यकारणत्वेन) असंबन्धो विषाणवत्।।१६।।

**सम्भवे** **हेतुफलयोः** उत्पत्तौ **क्रमः** **एषितव्यः** **त्वया** अन्वेष्टव्यः हेतुः पूर्वं पश्चात्फलं च इति।

इतश्च **युगपत्सम्भवे** **यस्माद्** हेतु-फलयोः कार्य-कारणत्वेन **असम्बन्धः**, यथा युगपत्सम्भवतोः सव्येतर-गो-

**विषाण**योः।। ४.१६ ।।

कथमसम्बन्ध इत्याह -

**फलादुत्पद्यमानः सन्न ते हेतुः प्रसिध्यति ।**

**अप्रसिद्धः कथं हेतुः फलमुत्पादयिष्यति ।। ४.१७ ।।**

फलादुत्पद्यमानः सन् हेतुः ते (तव पूर्वपक्षिणः) न प्रसिध्यति। अप्रसिद्धः (हेतुगर्भविशेषणम्) हेतुः (शशविषाणवत्) कथं (आक्षेपार्थे) फलम् उत्पादयिष्यति।। १७।।

जन्यात्स्वतोऽलब्धात्मकात् **फलात्** **उत्पद्यमानः** **सन्** शश-विषाणादेः इव असतो **न** **हेतुः** **प्रसिध्यति** जन्म न

लभते।

अलब्धात्मकः **अप्रसिद्धः** सन् शश-विषाणादि-कल्पः तव **कथं** **फलमुत्पादयिष्यति** न हि इतरेतरापेक्ष-सिद्ध्योः

शश-विषाण-कल्पयोः कार्य-कारण-भावेन सम्बन्धः क्वचिद् दृष्टः अन्यथा वेत्यभिप्रायः।। ४.१७ ।।

**यदि हेतोः फलात् सिद्धिः फलसिद्धिश्च हेतुतः ।**

**कतरत्पूर्वनिष्पन्नं यस्य सिद्धिरपेक्षया ।। ४.१८ ।।**

यदिफलात् हेतोः सिद्धिः (भवति) हेतुतः फलसिद्धिश्च (भवति) कतरत् (नं) पूर्वनिष्पन्नं (भवति)। यस्य (पश्चाद्भाविनः) (कार्यस्य) सिद्धिः (पूर्वसिद्धि) अपेक्षया (भवति) तद् ब्रूहि। १८।।

असम्बन्धता-दोषेणापोदितेऽपि हेतु-फलयोः कार्य-कारण-भावे, **यदि** हेतु-फलयोः अन्योन्य-सिद्धिरभ्युपगम्यत एव

त्वया, **कतरत्** **पूर्वनिष्पन्नं** हेतु-फलयोः **यस्य** पश्चाद्भाविनः **सिद्धिः** स्यात् पूर्वसिद्ध्य**पेक्षया**, तद् ब्रूहीत्यर्थः।।

४.१८ ।।

**अशक्तिरपरिज्ञानं क्रमकोपोऽथ वा पुनः ।**

**एवं हि सर्वथा बुद्धैरजातिः परिदीपिता ।। ४.१९ ।।**

अशक्तिः अपरिज्ञानं (भवति)। अथवा पुनः क्रमकोपः (भवति)। एवं हि सर्वथा बुद्धैः अजातिः परिदीपिता।। १९।।

अथ एतन्न शक्यते वक्तुमिति मन्यसे, सेयम् **अशक्तिः** **अपरिज्ञानं** तत्त्वाविवेकः, मूढतेत्यर्थः।

**अथ** **वा**, योऽयं त्वयोक्तः **क्रमः** हेतोः फलस्य सिद्धिः फलाच्च हेतोः सिद्धिरिति इतरेतरानन्तर्य-लक्षणः तस्य **कोपः** विपर्यासोऽन्यथाभावः स्याद् इत्यभिप्रायः।

**एवं** हेतु-फलयोः कार्य-कारण-भावानुपपत्तेः **अजातिः** सर्वस्यानुत्पत्तिः **परिदीपिता** प्रकाशिता अन्योन्य-पक्ष-दोषं ब्रुवद्भिः वादिभिः **बुद्धैः** पण्डितैरित्यर्थः।। ४.१९ ।।

ननु हेतु-फलयोः कार्य-कारण-भाव इत्यस्माभिरुक्तं शब्द-मात्रमाश्रित्य च्छलमिदं त्वयोक्तम् - पुत्राज्जन्म पितुर्यथा

(का. ४.१५) विषाणवच्चासम्बन्धः (का. ४.१६) इत्यादि।

न ह्यस्माभिः असिद्धाद्धेतोः फल-सिद्धिः, असिद्धाद् वा फलाद्धेतुसिद्धिरभ्युपगता।

किं तर्हि बीजाङ्कुरवत् कार्य-कारण-भावोऽभ्युपगम्यत इति। अत्रोच्यते -

**बीजाङ्कुराख्यो दृष्टान्तः सदा साध्यसमो हि सः ।**

**न हि साध्यसमो हेतुः सिद्धौ साध्यस्य युज्यते ।। ४.२० ।।**

सः बीजाङ्कुराख्यो दृष्टान्तः सदा हि साध्यसमो (भवति) । साध्यसमो हेतुः हि साध्यस्य सिद्धौ न युज्यते।।२०।।

**बीजाङ्कुराख्यो** **दृष्टान्तो** यः, **सः** **साध्येन** **समः** तुल्यो ममेत्यभिप्रायः।

**पूर्वपक्षाक्षेपः**
ननु प्रत्यक्षः कार्य-कारण-भावो बीजाङ्कुरयोरनादिः।

**समाधानम्**
न, पूर्वस्य पूर्वस्य अपरवद् आदिमत्त्वाभ्युपगमात्। यथा इदानीमुत्पन्नोऽपरः अङ्कुरो बीजाद् आदिमान्, बीजं चापरम् अन्यस्मादङ्कुरादि इति क्रमेण उत्पन्नत्वादादिमत्।

एवं पूर्वः पूर्वोऽङ्कुरो बीजं च पूर्वं पूर्वमादिमदेवेति प्रत्येकं सर्वस्य बीजाङ्कुरजातस्यादिमत्त्वात् कस्यचिदपि अनादित्वानुपपत्तिः। एवं हेतुफलयोः।

**पूर्वपक्षाक्षेपः**
अथ बीजाङ्कुर-सन्ततेरनादिमत्त्वमिति चेत्।

**समाधानम्**
न, एकत्वानुपपत्तेः। न हि बीजाङ्कुर-व्यतिरेकेण बीजाङ्कुर-सन्ततिर्नामैका अभ्युपगम्यते हेतुफल-सन्ततिर्वा तदनादित्व-वादिभिः। तस्मात्सूक्तम् हेतोः फलस्य चानादिः कथं तैरुपवर्ण्यते(का. ४.१४)इति। तथा च

अन्यदप्यनुपपत्तेर्न च्छलमित्यभिप्रायः।

न च लोके **साध्यसमो** **हेतुः** **साध्यस्य** **सिद्धौ** सिद्धिनिमित्तं (**युज्यते**) प्रयुज्यते प्रमाण-कुशलैरित्यर्थः। हेतुरिति

दृष्टान्तोऽत्राभिप्रेतः, गमकत्वात्। प्रकृतो हि दृष्टान्तः, न हेतुरिति।। ४.२० ।।

कथं बुद्धैरजातिः परिदीपिता इत्याह -

**पूर्वापरापरिज्ञानमजातेः परिदीपकम् ।**

**जायमानाद्धि वै धर्मात्कथं पूर्वं न गृह्यते ।। ४.२१ ।।**

पूर्वापरापरिज्ञानम् अजातेः परिदीपकं (भवति)। जायमानाद्धि धर्मात् वै पूर्वं (कारणम्) कथं (त्वया) न गृह्यते।। २१।।

यदेतद् हेतुफलयोः **पूर्वापरापरिज्ञानम्**, तच्चैतद् **अजातेः** **परिदीपकम्** अवबोधकमित्यर्थः।

जायमानो हि चेद् **धर्मो** गृह्यते, **कथं** तस्मात् **पूर्वं** कारणं **न** **गृह्यते** अवश्यं हि जायमानस्य ग्रहीत्रा तज्जनकं ग्रहीतव्यम्, जन्य-जनकयोः सम्बन्धस्य अनपेतत्वात्।

तस्मादजातिपरिदीपकं तदित्यर्थः।। ४.२१ ।।

इतश्च न जायते किञ्चित् यज्जायमानं वस्तु -

**स्वतो वा परतो वापि न किञ्चिद्वस्तु जायते ।**

**सदसत्सदसद्वापि न किञ्चिद्वस्तु जायते ।। ४.२२ ।।**

स्वतो वा परतो वा (उभयतः वा) अपि किंचिद्वस्तु न जायते। सदसद् (न जायते) सदसद्वाऽपि किंचिद्वस्तु न जायते।। २२।।

**स्वतः** **परतः** उभयतो वा **सद्** **असत्** **सदसद्वा** **न** **जायते**।

न तस्य केनचिदपि प्रकारेण जन्म सम्भवति।

न तावत् स्वयमेवापरिनिष्पन्नात्स्वतः स्वरूपात्स्वयमेव जायते, यथा घटस्तस्मादेव घटात्।

नापि परतः अन्यस्मादन्यः, यथा घटात्पटः।

तथा नोभयतः, विरोधात्। यथा घटपटाभ्यां घटः पटो वा न जायते।

**आक्षेपः**

ननु मृदो घटो जायते पितुश्च पुत्रः।

**समाधानम्**

सत्यम्, अस्ति जायत इति प्रत्ययः शब्दश्च मूढानाम्। तावेव तु शब्द-प्रत्ययौ विवेकिभिः परीक्ष्येते - किं सत्यमेव तौ, उत मृषा इति। यावता परीक्ष्यमाणे शब्द-प्रत्यय-विषयं वस्तु घट-पुत्रादि-लक्षणं शब्द-मात्रमेव तत्। वाचारम्भणम् (छा. ६.१.४) इति श्रुतेः।

सच्चेद् न जायते, सत्त्वात्, मृत्पित्रादिवत्। यद्यसत्, तथापि न जायते, असत्त्वादेव, शश-विषाणादिवत्।

अथ सदसत्, तथापि न जायते विरुद्धस्य एकस्यासम्भवात्। **अतो न किञ्चिद्वस्तु जायते** इति सिद्धम्।

येषां पुनर्जनिरेव जायत इति क्रिया-कारक-फलैकत्वमभ्युपगम्यते क्षणिकत्वं च वस्तुनः, ते दूरत एव न्यायापेताः। इदमित्थमित्यवधारण-क्षणान्तरानवस्थानात्, अननुभूतस्य स्मृत्यनुपपत्तेश्च।। ४.२२ ।।

किञ्च, हेतुफलयोरनादित्वमभ्युपगच्छता त्वया बलाद्धेतुफलयोरजन्मैवाभ्युपगतं स्यात्। तत् कथम्

**हेतुर्न जायतेऽनादेः फलं चापि स्वभावतः ।**

**आदिर्न विद्यते यस्य तस्य ह्यादिर्न विद्यते ।। ४.२३ ।।**

अनादेः हेतुर्न जायते। फलं स्वभावतः च अपि (न जायते) (चापेः अनादेः हेतोः फलं न जायते। स्वभावतः अपि फलं न जयते)। यस्य आदिर्न विद्यते तस्य ह्यदिर्न विद्यते।। २३

**अनादेः** आदि-रहितात्फलात् **हेतुः** **न** **जायते**। न ह्यनुत्पन्नादनादेः फलाद्धेतोर्जन्मेष्यते त्वया।

**फलं** **चापि** आदिरहितादनादेः हेतोरजात् **स्वभावतः** एव निर्निमित्तं जायत इति नाभ्युपगम्यते।

तस्मादनादित्वमभ्युपगच्छता त्वया हेतु-फलयोरजन्मैवाभ्युपगम्यते।

यस्मात् **आदिः** कारणं **न** **विद्यते** **यस्य** लोके, **तस्य** **ह्यादिः** पूर्वोक्ता जातिः **न** **विद्यते**।

कारणवत एव ह्यादिरभ्युपगम्यते, न अकारणवतः।। ४.२३ ।।

उक्तस्यैवार्थस्य दृढीकरण-चिकीर्षया पुनराक्षिपति -

## प्रज्ञप्तेः सनिमित्तत्वमन्यथा द्वयनाशतः ।

## संक्लेशस्योपलब्धेश्च परतन्त्रास्तिता मता ।। ४.२४ ।।

अन्यथा द्वयनाशतः प्रज्ञप्तेः सनिमित्तत्वम् (अस्ति)। संक्लेशस्योपलब्धेश्च परतन्त्रास्तिता मता।। २४।।
अथवा (वरम्)
अन्यथा द्वयनाशतः संक्लेशस्योपलब्धेश्च प्रज्ञप्तेः सनिमित्तत्वम् (अस्ति)। (अतः) परतन्त्रास्तिता मता।। २४।।

**पूर्वपक्षी**
प्रज्ञानं **प्रज्ञप्तिः** शब्दादि-प्रतीतिः, **तस्याः** **सनिमित्तत्वम्,** निमित्तं कारणं विषय इत्येतत्।

सनिमित्तत्वं सविषयत्वं स्वात्म-व्यतिरिक्त-विषयतेत्येतत् प्रतिजानीमहे।

न हि निर्विषया प्रज्ञप्तिः शब्दादि-प्रतीतिः स्यात्। तस्याः सनिमित्तत्वात्।

**अन्यथा** निर्विषयत्वे शब्द-स्पर्श-नील-पीत-लोहितादि-प्रत्यय-वैचित्र्यस्य **द्वयस्य** **नाशतः** नाशोऽभावः प्रसज्येतेत्यर्थः।

न च प्रत्यय-वैचित्र्यस्य द्वयस्याभावोऽस्ति, प्रत्यक्षत्वात्। अतः प्रत्यय-वैचित्र्यस्य द्वयस्य दर्शनात्।

परेषां तन्त्रं परतन्त्रमित्यन्य-शास्त्रम्। तस्य **परतन्त्रस्य** परतन्त्राश्रयस्य बाह्यार्थस्य ज्ञान-व्यतिरिक्तस्य **अस्तिता मता** अभिप्रेता। न हि प्रज्ञप्तेः प्रकाश-मात्र-स्वरूपाया नील-पीतादि-बाह्यालम्बन-वैचित्र्यमन्तरेण स्वभाव-भेदेन एव वैचित्र्यं सम्भवति। स्फटिकस्य इव नीलाद्युपाध्याश्रयैर्विना वैचित्र्यं न घटत इत्यभिप्रायः।

इतश्च परतन्त्राश्रयस्य बाह्यार्थस्य ज्ञान-व्यतिरिक्तस्यास्तिता। संक्लेशनं **संक्लेशः** दुःखमित्यर्थः।

**उपलभ्यते** हि अग्नि-दाहादि-निमित्तं दुःखम्। यद्यग्न्यादि-बाह्यं दाहादि-निमित्तं विज्ञान-व्यतिरिक्तं न स्यात्, ततो दाहादि-दुःखं नोपलभ्येत। उपलभ्यते तु। अतः तेन मन्यामहे अस्ति बाह्योऽर्थ इति।

न हि विज्ञान-मात्रे संक्लेशो युक्तः, अन्यत्रादर्शनादित्यभिप्रायः।। ४.२४ ।।

अत्रोच्यते -

**प्रज्ञप्तेः सनिमित्तत्वमिष्यते युक्तिदर्शनात् ।**

**निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनात् ।। ४.२५ ।।**

युक्तिदर्शनात् प्रज्ञप्तेः सनिमित्तत्वं त्वया इष्यते। भूतदर्शनात् निमित्तस्य अनिमित्तत्वं मया इष्यते ।। २५।।

**सिद्धान्ती**

बाढमेवं **प्रज्ञप्तेः** **सनिमित्तत्वं** द्वय-संक्लेशोपलब्धि-**युक्तिदर्शनाद्** **इष्यते** त्वया।

स्थिरीभव तावत्त्वं युक्ति-दर्शनं वस्तुनस्तथात्वाभ्युगमे कारणमित्यत्र।

**पूर्वपक्षी**

ब्रूहि किं ततः इति।

**सिद्धान्ती**

उच्यते। **निमित्तस्य** प्रज्ञप्त्यालम्बनाभिमतस्य तव घटादेः **अनिमित्तत्वम्** अनालम्बनत्वं वैचित्र्याहेतुत्वम् **इष्यते**

अस्माभिः। कथम् **भूतदर्शनात्** परमार्थ-दर्शनादित्येतत्।

न हि घटो यथाभूत-मृद्रूप-दर्शने सति तद्व्यतिरेकेणास्ति, यथा अश्वान्महिषः।

पटो वा तन्तु-व्यतिरेकेण तन्तवश्च अंशु-व्यतिरेकेण इत्येवमुत्तरोत्तर-भूत-दर्शन आ शब्द-प्रत्यय-निरोधान्नैव निमित्तमुपलभामहे इत्यर्थः।

अथ वा, **अभूत-दर्शनाद्** बाह्यार्थस्य अनिमित्तत्वमिष्यते रज्ज्वादौ इव सर्पादेरित्यर्थः।

भ्रान्ति-दर्शन-विषयत्वाच्च निमित्तस्यानिमित्तत्वं भवेत्। तदभावे अभावात्।

न हि सुषुप्त-समाहित-मुक्तानां भ्रान्ति-दर्शनाभावे आत्म-व्यतिरिक्तो बाह्योऽर्थ उपलभ्यते।

न ह्युन्मत्तावगतं वस्त्वनुन्मत्तैरपि तथाभूतं गम्यते। एतेन द्वय-दर्शनं संक्लेशोपलब्धिश्च प्रत्युक्ता।। ४.२५ ।।

यस्मान्नास्ति बाह्यं निमित्तम्, अतः -

**चित्तं न संस्पृशत्यर्थं नार्थाभासं तथैव च ।**

**अभूतो हि यतश्चार्थो नार्थाभासस्ततः पृथक् ।। ४.२६ ।।**

चित्तम् अर्थं न संस्पृशति। तथैव अर्थाभासं च न (संस्पृशति)। यतः हि अर्थः अभूतः (अस्ति)। अर्थाभासः च ततः पृथक् न अस्ति।। २६।।

**चित्तं** **न** **स्पृशत्यर्थं** बाह्यालम्बन-विषयम्। **न** अपि **अर्थाभासम्**, चित्तत्वात्, स्वप्न-चित्तवत्।

**अभूतो** **हि** जागरितेऽपि। स्वप्नार्थवद् एव बाह्यः शब्दादि-**अर्थो** **यतः** उक्त-हेतुत्वाच्च।

**न** अपि **अर्थाभासः** चित्तात् **पृथक्**। चित्तमेव हि घटाद्यर्थवद् अवभासते यथा स्वप्ने।। ४.२६ ।।

ननु विपर्यासस्तर्हि असति घटादौ घटाद्याभासता चित्तस्य। तथा च सति अविपर्यासः क्वचिद्वक्तव्य इति।

अत्रोच्यते -

**निमित्तं न सदा चित्तं संस्पृशत्यध्वसु त्रिषु ।**

**अनिमित्तो विपर्यासः कथं तस्य भविष्यति ।। ४.२७ ।।**

चित्तं सदा त्रिषु अध्वसु निमित्तं न संस्पृशति। तस्य अनिमित्तो विपर्यासः कथं भविष्यति।। २७।।

**निमित्तं** विषयम् अतीतानागतवर्तमान-**अध्वसु त्रिषु** अपि **सदा चित्तं न संस्पृशेद्** एव हि।

यदि हि क्वचित् संस्पृशेत्, सः अविपर्यासः परमार्थ इति।

अतस्तदपेक्षया असति घटे घटाद्याभासता विपर्यासः स्यात्। न तु तदस्ति कदाचिदपि चित्तस्यार्थसंस्पर्शनम्।

तस्माद् **अनिमित्तः विपर्यासः कथं तस्य** चित्तस्य **भविष्यति** न कथञ्चिद् विपर्यासोऽस्तीत्यभिप्रायः।

अयमेव हि स्वभावः चित्तस्य, यदुत असति निमित्ते घटादौ तद्वद् अवभासनम्।। ४.२७ ।।

प्रज्ञप्तेः सनिमित्तत्वम् (का. ४.२५) इत्यादि एतदन्तं विज्ञानवादिनो बौद्धस्य वचनं बाह्यार्थवादि-पक्ष-प्रतिषेध-परम् आचार्येणानुमोदितम्। तदेव हेतुं कृत्वा तत्पक्ष-प्रतिषेधाय तदिदमुच्यते -

**तस्मान्न जायते चित्तं चित्तदृश्यं न जायते ।**

**तस्य पश्यन्ति ये जातिं खे वै पश्यन्ति ते पदम् ।। ४.२८ ।।**

तस्मात् (यथा) चित्तदृश्यं न जायते (तथा) चित्तं न जायते। ये तस्य जातिं पश्यन्ति ते वै खे पदं पश्यन्ति ।। २८

तस्मादित्यादि। यस्मादसत्येव घटादौ घटाद्याभासता चित्तस्य विज्ञानवादिना अभ्युपगता, तदनुमोदितमस्माभिरपि भूतदर्शनात्।

**तस्मात्** तस्यापि चित्तस्य जायमानावभासता असत्येव जन्मनि युक्ता भवितुमिति अतो **न जायते चित्तम्**। यथा **चित्तदृश्यं न जायते** अतः **तस्य** चित्तस्य **ये जातिं पश्यन्ति** विज्ञान-वादिनः क्षणिकत्व-दुःखित्व-शून्यत्वानात्मत्वादि च, तेनैव चित्तेन चित्त-स्वरूपं द्रष्टुमशक्यं पश्यन्तः **खे वै पश्यन्ति ते पदं** पक्ष्यादीनाम्। अत इतरेभ्योऽपि द्वैतिभ्योऽत्यन्त-साहसिकाः इत्यर्थः।

येऽपि शून्यवादिनः पश्यन्त एव सर्वशून्यतां स्वदर्शनस्यापि शून्यतां प्रतिजानते, ते ततोऽपि साहसिकतराः खं मुष्टिनापि जिघृक्षन्ति।। ४.२८ ।।

उक्तैर्हेतुभिरजमेकं ब्रह्मेति सिद्धम्। यत्पुनरादौ प्रतिज्ञातम्, तत्फलोपसंहारार्थोऽयं श्लोकः -

**अजातं जायते यस्मादजातिः प्रकृतिस्ततः ।**

**प्रकृतेरन्यथाभावो न कथञ्चिद् भविष्यति ।। ४.२९ ।।**

अजातं जायते (इति वादिनः कल्पयन्ति) यस्माद् अजातिः (ब्रह्मणः) प्रकृतिः (भवति) ततः प्रकृतेरन्यथाभावः कथंचिद् न भविष्यति।। २९।।

अजातं यद् चित्तं ब्रह्मैव जायत इति वादिभिः परिकलप्यते, तद् **अजातं** **जायते** **यस्मात्**, **अजातिः** **प्रकृतिः**

तस्य। **ततः** तस्मात् अजात-रूपायाः **प्रकृतेरन्यथाभावो** जन्म **न** कथञ्चिद् भविष्यति।। ४.२९ ।।

अयं चापर आत्मनः संसार-मोक्षयोः परमार्थ-सद्भाव-वादिनां दोषः उच्यते -

**अनादेरन्तवत्त्वं च संसारस्य न सेत्स्यति ।**

**अनन्तता चादिमतो मोक्षस्य न भविष्यति ।। ४.३० ।।**

अनादेः संसारस्य च अन्तवत्वं न सेत्स्यति। आदिमतो मोक्षस्य च अनन्तता न भविष्यति।। ३०।।

**अनादेः** अतीत-कोटि-रहितस्य **संसारस्य** **अन्तवत्त्वं** समाप्तिः **न** **सेत्स्यति** युक्तितः सिद्धिं नोपयास्यति।

न ह्यनादिः सन् अन्तवान्कश्चित्पदार्थो दृष्टो लोके।

**आक्षेपः**

बीजाङ्कुर-सम्बन्ध-नैरन्तर्य-विच्छेदो दृष्ट इति चेत्।

**समाधानम्**

न, एक-वस्त्वभावेनापोदितत्वात् (का. ४.२०)।

तथा **अनन्ततापि** विज्ञान-प्राप्ति-काल-प्रभवस्य **मोक्षस्य** **आदिमतो** **न** **भविष्यति**। घटादिष्वदर्शनात्।

**आक्षेपः**

घटादि-विनाशवद् अवस्तुत्वाद् अदोषः इति चेत्।

**समाधानम्**

तथा च मोक्षस्य परमार्थ-सद्भाव-प्रतिज्ञा-हानिः। असत्त्वादेव शशविषाणस्य इव आदिमत्त्वाभावश्च।४.३०।।

**आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।**

**वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ।। ४.३१ ।।**

**सप्रयोजनता तेषां स्वप्ने विप्रतिपद्यते ।**

**तस्मादाद्यन्तवत्त्वेन मिथ्यैव खलु ते स्मृताः ।। ४.३२ ।।**

वैतथ्ये कृत-व्याख्यानौ श्लोकौ (का. २.६-७) इह संसार-मोक्षाभाव-प्रसङ्गेन पठितौ।। ४.३१-३२ ।।

**सर्वे धर्मा मृषा स्वप्ने कायस्यान्तर्निदर्शनात् ।**

**संवृतेऽस्मिन् प्रदेशे वै भूतानां दर्शनं कुतः ।। ४.३३ ।।**

स्वप्ने सर्वे धर्मा कायस्यान्तर्निदर्शनात् मृषा (भवन्ति)। संवृते अस्मिन् प्रदेशे वै भूतानां दर्शनं कुतः।। ३३।।

**भाष्यम्**

निमित्तस्यानिमित्तत्वमिष्यते भूतदर्शनात् (४.२५) इत्ययमर्थः प्रपञ्च्यते एतैः श्लोकैः।। ४.३३ ।।

**न युक्तं दर्शनं गत्वा कालस्यानियमाद् गतौ ।**

**प्रतिबुद्धश्च वै सर्वस्तस्मिन् देशे न विद्यते ।। ४.३४ ।।**

गतौ कालस्यानियमाद् गत्वा दर्शनं युक्तं न (भवति)। प्रतिबुद्धश्च वै सर्वः तस्मिन् देशे न विद्यते।। ३४

**भाष्यम्**

जागरिते गत्यागमन-कालः नियतः देशः प्रमाणतो यः, तस्य **अनियमाद्** नियमस्याभावात् स्वप्ने न देशान्तर-

गमनमित्यर्थः।। ४.३४ ।।

**मित्राद्यैः सह संमन्त्र्य सम्बुद्धो न प्रपद्यते ।**

**गृहीतं चापि यत्किञ्चित् प्रतिबुद्धो न पश्यति ।। ४.३५ ।।**

**मित्राद्यैः** **सह** **संमन्त्र्य** तदेव मन्त्रणं **प्रतिबुद्धो** **न** **प्रपद्यते**। **गृहीतं** **च** **यत्किञ्चिद्** हिरण्यादि **न** प्राप्नोति।

अतश्च न देशान्तरं गच्छति स्वप्ने।। ४.३५ ।।

**स्वप्ने चावस्तुकः कायः पृथगन्यस्य दर्शनात् ।**

**यथा कायस्तथा सर्वं चित्तदृश्यमवस्तुकम् ।। ४.३६ ।।**

**स्वप्ने** च अटन्दृश्यते यः **कायः** सः **अवस्तुकः** ततः **अन्यस्य** स्वाप-देशस्थस्य **पृथक्** कायान्तरस्य **दर्शनात्**।

**यथा** स्वप्नदृश्यः **कायः** असन्, **तथा** **सर्वं** **चित्त-दृश्यम्** **अवस्तुकं** जागरितेऽपि चित्त-दृश्यत्वादित्यर्थः।

स्वप्न-समत्वाद् असञ्जागरितमपीति प्रकरणार्थः।। ४.३६ ।।

इतश्च असत्त्वं जाग्रद्वस्तुनः -

**ग्रहणाज्जागरितवत्तद्धेतुः स्वप्न इष्यते ।**

**तद्धेतुत्वात्तु तस्यैव सज्जागरितमिष्यते ।। ४.३७ ।।**

**जागरितवत्** जागरितस्य इव **ग्रहणाद्** ग्राह्य-ग्राहक-रूपेण स्वप्नस्य, तद् जागरितं हेतुः अस्य स्वप्नस्य स स्वप्नः

**तद्धेतुः** जागरित-कार्यम् **इष्यते**।

**तद्धेतुत्वात्** जागरित-कार्यत्वात् **तस्यैव** स्वप्नदृश एव **सज्जागरितम्**, न त्वन्येषाम्।

यथा स्वप्न इत्यभिप्रायः।

यथा स्वप्नः स्वप्नदृश एव सन् साधारण-विद्यमान-वस्तुवद् अवभासते, तथा तत्कारणत्वात् साधारण-विद्यमान-

वस्तुवद् अवभासमानम्, न तु साधारणं विद्यमान-वस्तु स्वप्नवद् एव इत्यभिप्रायः।। ४.३७ ।।

**उत्पादस्याप्रसिद्धत्वादजं सर्वमुदाहृतम् ।**

**न च भूतादभूतस्य सम्भवोऽस्ति कथञ्चन ।। ४.३८ ।।**

**आक्षेपः**

ननु स्वप्न-कारणत्वेऽपि जागरित-वस्तुनो न स्वप्नवद् अवस्तुत्वम्। अत्यन्त-चलो हि स्वप्नः जागरितं तु स्थिरं

लक्ष्यते।

**समाधानम्**

सत्यमेवमविवेकिनां स्यात्। विवेकिनां तु न कस्यचिद्वस्तुन उत्पादः प्रसिद्धः।

अतः **अप्रसिद्धत्वाद्** **उत्पादस्य** आत्मैव सर्वमिति **अजं** **सर्वम्** **उदाहृतं** वेदान्तेषु सबाह्याभ्यन्तरो ह्यजः (बृ.

२.१.२) इति। यदपि मन्यसे जागरितात्सतः असन्स्वप्नो जायत इति, तदसत्।

**न** **भूताद्** विद्यमानाद् **अभूतस्य** असतः **सम्भवोऽस्ति** लोके।

न ह्यसतः शश-विषाणादेः सम्भवो दृष्टः **कथञ्चिद्** अपि।। ४.३८ ।।

ननु उक्तं त्वयैव स्वप्नो जागरित-कार्यमिति। तत्कथमुत्पादोऽप्रसिद्ध इति उच्यते श्रृणु तत्र यथा कार्य-कारण-

भावोऽस्माभिरभिप्रेत इति -

**असज्जागरिते दृष्ट्वा स्वप्ने पश्यति तन्मयः ।**

**असत्स्वप्नेऽपि दृष्ट्वा च प्रतिबुद्धो न पश्यति ।। ४.३९ ।।**

**असद्** अविद्यमानं रज्जुसर्पवद् विकल्पितं वस्तु **जागरिते** **दृष्ट्वा** तद्भाव-भावितः **तन्मयः** **स्वप्ने**ऽपि जागरितवद्

ग्राह्य-ग्राहक-रूपेण विकल्पयन् **पश्यति**।

तथा **असत्स्वप्नेऽपि** **दृष्ट्वा** च **प्रतिबुद्धो** **न** **पश्यति** अविकल्पयन्।

च-शब्दाद् तथा जागरितेऽपि दृष्ट्वा स्वप्ने न पश्यति कदाचिदित्यर्थः।

तस्माद् जागरितं स्वप्न-हेतुरित्युच्यते, न तु परमार्थसदिति कृत्वा।। ४.३९ ।।

परमार्थतस्तु न कस्यचित्केनचिदपि प्रकारेण कार्य-कारण-भाव उपपद्यते। कथम्

**नास्त्यसद्धेतुकमसत्सदसद्धेतुकं तथा ।**

**सच्च सद्धेतुकं नास्ति सद्धेतुकमसत्कुतः ।। ४.४०।।**

**नास्ति** **असद्धेतुकम्** असत् शश-विषाणादि हेतुः कारणं यस्य असत एव खकुसुमादेः, तदसद्धेतुकम् असन्न विद्यते। तथा **सद्** अपि घटादि-वस्तु **असद्धेतुकम्** शश-विषाणादि-कार्यं नास्ति।

**तथा** **सच्च** विद्यमानं घटादि वस्त्वन्तर-कार्यं नास्ति।

**सत्कार्यम्** **असत्** **कुतः** एव सम्भवति न चान्यः कार्य-कारण-भावः सम्भवति शक्यो वा कल्पयितुम्।

अतो विवेकिनामसिद्ध एव कार्य-कारण-भावः कस्यचिद् इत्यभिप्रायः।। ४.४० ।।

पुनरपि जाग्रत्स्वप्नयोरसतोरपि कार्य-कारण-भावाशङ्काम् अपनयन्नाह -

**विपर्यासाद्यथा जाग्रदचिन्त्यान्भूतवत्स्पृशेत् ।**

**तथा स्वप्ने विपर्यासाद्धर्मांस्तत्रैव पश्यति ।। ४.४१ ।।**

**विपर्यासाद्** अविवेकितः **यथा** **जाग्रद्** जागरिते **अचिन्त्यान्** भावान् अशक्य-चिन्तनीयान् रज्जु-सर्पादीन् **भूतवत्**

परमार्थवत् **स्पृशेत्**।

स्पृशन् इव विकल्पयेदित्यर्थः।

कश्चिद्यथा, **तथा** **स्वप्ने** **विपर्यासाद्** हस्त्यादीन् **धर्मान्** पश्यन् इव विकल्पयति।

**तत्रैव** **पश्यति**, न तु जागरितादुत्पद्यमानानित्यर्थः।। ४.४१ ।।

**उपलम्भात्समाचारादस्तिवस्तुत्ववादिनाम् ।**

**जातिस्तु देशिता बुद्धैरजातेस्त्रसतां सदा ।। ४.४२ ।।**

यापि **बुद्धैः** अद्वैत-वादिभिः **जातिः** **देशिता** उपदिष्टा। उपलम्भनमुपलम्भः, तस्मात् **उपलब्धेः** इत्यर्थः।

**समाचारात्** वर्णाश्रमादि-धर्म-समाचरणाच्च।

ताभ्यां हेतुभ्याम् **अस्ति-वस्तुत्व-वादिनाम्** अस्ति वस्तुभाव इत्येवं वदन-शीलानां दृढाग्रहवतां श्रद्दधानानां मन्द-

विवेकिनामर्थोपायत्वेन सा देशिता जातिः। तां गृह्णन्तु तावत्।

वेदान्ताभ्यासिनां तु स्वयमेव अजाद्वयात्म-विषयो विवेको भविष्यतीति। न तु परमार्थ-बुद्धया।

ते हि श्रोत्रियाः स्थूल-बुद्धित्वाद् **अजातेः** अजाति-वस्तुनः **सदा** **त्रस्यन्ति** आत्मनाशं मन्यमाना अविवेकिन

इत्यर्थः। उपायः सोऽवताराय (३.१५) इत्युक्तम्।। ४.४२ ।।

**अजातेस्त्रसतां तेषामुपलम्भाद्वियन्ति ये ।**

**जातिदोषा न सेत्स्यन्ति दोषोऽप्यल्पो भविष्यति ।। ४.४३ ।।**

उपलम्भाद् ये वियन्ति तेषाम् अजातेस्त्रसतां जातिदोषा न सेत्स्यन्ति। दोषोऽप्यल्पो भविष्यति।। ४३

ये च एवम् **उपलम्भात्** समाचाराद्व **अजातेः** अजातिवस्तुनः **त्रसन्तः** अस्ति वस्त्विति अद्वयादात्मनः, **वियन्ति** विरुद्धं यन्ति। द्वैतं प्रतिपद्यन्त इत्यर्थः।

**तेषाम्** अजातेः त्रसतां श्रद्दधानानां सन्मार्गावलम्बिनां **जातिदोषाः** जात्युपलम्भकृता दोषाः **न** **सेत्स्यन्ति** सिद्धिं नोपयास्यन्ति, विवेक-मार्ग-प्रवृत्तत्वात्।

यद्यपि कश्चिद् **दोषः** स्यात्, सोऽपि **अल्पः** एव भविष्यति, सम्यग्दर्शनाप्रतिपत्ति-हेतुक इत्यर्थः।। ४.४३ ।।

**आक्षेपः**

ननु उपलम्भ-समाचारयोः प्रमाणत्वादस्त्येव द्वैतं वस्त्विति।

**समाधानम्**

न, उपलम्भ-समाचारयोर्व्यभिचारात्। कथं व्यभिचारः इत्युच्यते -

**उपलम्भात्समाचारान्मायाहस्ती यथोच्यते ।**

**उपलम्भात्समाचारादस्ति वस्तु तथोच्यते ।। ४.४४ ।।**

यथा उपलम्भात्समाचारात् मायाहस्ती (अस्ति इति) उच्यते। तथा उपलम्भात्समाचाराद् वस्तु (द्वैतम्) अस्ति इति उच्यते।। ४४

**उपलभ्यते** हि **मायाहस्ती**। हस्तीव, हस्तिनम् इव अत्र **समाचरन्ति**।

बन्धनारोहणादि-हस्ति-सम्बन्धिभिर्धर्मैः, हस्तीति च **उच्यते** असन्नपि **यथा**, तथैव **उपलम्भात्समाचाराद्** द्वैतं

भेदरूपं **अस्ति** **वस्तु** इति **उच्यते**। तस्मान्नोपलम्भ-समाचारौ द्वैत-वस्तु-सद्भावे हेतू भवतः इत्यभिप्रायः।।

४.४४ ।।

किं पुनः परमार्थसद्वस्तु, यदास्पदा जात्याद्यसद्बुद्धय इत्याह -

**जात्याभासं चलाभासं वस्त्वाभासं तथैव च ।**

**अजाचलमवस्तुत्वं विज्ञानं शान्तमद्वयम् ।। ४.४५ ।।**

अजाचलमवस्तुत्वं विज्ञानम् एव जात्याभासं चलाभासं तथा वस्त्वाभासं च (भवति)। अतः तत् शान्तमद्वयं च भवति।। ४५

अजाति सत् जातिवद् अवभासत इति **जात्याभासम्**। तद्यथा देवदत्तो जायत इति।

**चलाभासं** चलम् इव आभासत इति। यथा स एव देवदत्तो गच्छतीति।

**वस्त्वाभासं** वस्तु द्रव्यं धर्मि, तद्वद् अवभासत इति वस्त्वाभासम्। यथा स एव देवदत्तो गौरो दीर्घ इति।

जायते देवदत्तः स्पन्दते दीर्घो गौर इत्येवमवभासते, परमार्थतस्तु **अजमचलमवस्तुत्वम्** अद्रव्यं च।

किं तद् एवंप्रकारम् **विज्ञानं** विज्ञप्तिः। जात्यादि-रहितत्वात् **शान्तम्**। अत एव **अद्वयं** च तदित्यर्थः।। ४.४५ ।।

**एवं न जायते चित्तमेवं धर्मा अजाः स्मृताः ।**

**एवमेव विजानन्तो न पतन्ति विपर्यये ।। ४.४६ ।।**

एवं चित्तं न जायते। एवं धर्माः अजाः स्मृताः। एवमेव विजानन्तः सन्तः विपर्यये न पतन्ति (संसारे अनुवर्तन्ते) ।। ४६

**एवं** यथोक्तेभ्यो हेतुभ्यः **न** **जायते** **चित्तम्**। **एवं** **धर्माः** आत्मानः **अजाः** **स्मृताः** ब्रह्मविद्भिः।

धर्मा इति बहुवचनं देहभेदानुविधायित्वाद् अद्वयस्यैव उपचारतः।

**एवमेव** यथोक्तं विज्ञानं जात्यादि-रहितमद्वयमात्म-तत्त्वं **विजानन्तः** त्यक्त-बाह्यैषणाः पुनः **न** **पतन्ति** अविद्या-ध्वान्त-सागरे **विपर्यये**।

तत्र को मोहः कः शोक एकत्वमनुपश्यतः(ई. ७) इत्यादि-मन्त्र-वर्णात्।। ४.४६ ।।

यथोक्तं परमार्थ-दर्शनं प्रपञ्चयिष्यन्नाह -

**ऋजुवक्रादिकाभासमलातस्पन्दितं यथा ।**

**ग्रहणग्राहकाभासं विज्ञानस्पन्दितं तथा ।। ४.४७ ।।**

यथा ऋजुवक्रादिकाभासमलातस्पन्दितं (भवति) तथा ग्रहणग्राहकाभासं विज्ञानस्पन्दितं (भवति)।। ४७।।

**यथा** हि लोके **ऋजु-वक्रादि**-प्रकार**ाभासम्** **अलात-स्पन्दितम्** उल्काचलनम्, **तथा** **ग्रहण-ग्राहकाभासं**

विषयि-विषयाभासमित्यर्थः।

किं तत् **विज्ञानस्पन्दितम्**। स्पन्दितम् इव स्पन्दितमविद्यया।

न हि अचलस्य विज्ञानस्य स्पन्दनमस्ति। अजाचलम् (का. ४.४५) इति ह्युक्तम्।। ४.४७ ।।

**अस्पन्दमानमलातमनाभासमजं यथा ।**

**अस्पन्दमानं विज्ञानमनाभासमजं तथा ।। ४.४८ ।।**

यथा अस्पन्दमानमालातमनाभासमजं (भवति) तथा अस्पन्दमानं विज्ञानम् अनाभासमजं (च भवति)।। ४८।।

**अस्पन्दमानं** स्पन्दन-वर्जितं तदेव **अलातम्** ऋज्वाद्याकारेणाजायमानम् **अनाभासम्** **अजं** **यथा**,

**तथा** अविद्यया स्पन्दमानम् अविद्योपरमे **अस्पन्दमानं** जात्याद्याकारेण **अनाभासम्** **अजम्** अचलं

भविष्यतीत्यर्थः।। ४.४८ ।।

किञ्च -

**अलाते स्पन्दमाने वै नाऽऽभासा अन्यतोभुवः ।**

**न ततोऽन्यत्र निःस्पन्दान्नालातं प्रविशन्ति ते ।। ४.४९ ।।**

अलाते स्पन्दमाने (सति) वै आभासा अन्यतोभुवः न (भवन्ति)। निस्पन्दाद् ततः (अलातात्) अन्यत्र न (निर्गताः सन्तः)। ते अलातं न प्रविशन्ति ।। ४९।।

तस्मिन्नेव **अलाते** **स्पन्दमाने** ऋजु-वक्रादि-**आभासाः** अलातादन्यतः कुतश्चिद् आगत्य अलाते नैव भवन्तीति

**न** **अन्यतोभुवः**। **न** च **तस्माद्** निःस्पन्दाद् अलाताद् **अन्यत्र** निर्गताः। **न** च निःस्पन्दम् **अलातम्** एव

**प्रविशन्ति** **ते**।। ४.४९ ।।

किञ्च -

**न निर्गता अलातात्ते द्रव्यत्वाभावयोगतः ।**

**विज्ञानेऽपि तथैव स्युराभासस्याविशेषतः ।। ४.५० ।।**

द्रव्यत्वाभावयोगतः ते अलातात् न निर्गताः । आभासस्याविशेषतः (पञ्चम्यर्थे तसिः हेतौ पञ्चमी) विज्ञाने (विज्ञानविषये) अपि तथैव स्युः ।। ५०

**न** **निर्गता** **अलातात्** **ते** आभासाः गृहादिवद्, **द्रव्यत्वाभावयोगतः** द्रव्यस्य भावो द्रव्यत्वम्, तदभावः

द्रव्यत्वाभावः, द्रव्यत्वाभाव-योगतः द्रव्यत्वाभाव-युक्तेः।

वस्तुत्वाभावादित्यर्थः।

वस्तुनो हि प्रवेशादि सम्भवति, नावस्तुनः।

**विज्ञानेऽपि** जात्याद्याभासाः **तथैव** **स्युः**, **आभासस्य** **अविशेषतः** तुल्यत्वात्।। ४.५० ।।

कथं तुल्यत्वमित्याह -

**विज्ञाने स्पन्दमाने वै नाभासा अन्यतोभुवः ।**

**न ततोऽन्यत्र निःस्पन्दान्न विज्ञानं विशन्ति ते ।। ४.५१ ।।**

विज्ञाने स्पन्दमाने (सति) वै आभासा अन्यतोभवः न (भवन्ति)। निस्पन्दाद् ततः (विज्ञानात्) अन्यत्र न (निर्गताः)। ते विज्ञानं न प्रविशन्ति।। ५१।।

**न निर्गतास्ते विज्ञानाद् द्रव्यत्वाभावयोगतः ।**

**कार्यकारणताभावाद्यतोऽचिन्त्याः सदैव ते ।। ४.५२ ।।**

अलातेन समानं सर्वं विज्ञानस्य। सदा अचलत्वं तु विज्ञानस्य विशेषः। जात्याद्याभासा विज्ञाने अचले किंकृता

इत्याह - **कार्यकारणताभावात्** जन्य-जनकत्वानुपपत्तेः अभाव-रूपत्वाद् **अचिन्त्याः** **ते** यतः **सदैव**।

यथा असत्सु ऋज्वाद्याभासेषु ऋज्वादि-बुद्धिर्दृष्टा अलातमात्रे, तथा असत्स्वेव जात्यादिषु विज्ञान-मात्रे जात्यादि-

बुद्धिर्मृषैवेति समुदायार्थः।। ४.५१-५२ ।।

अजमेकमात्मतत्त्वमिति स्थितम्। तत्र यैरपि कार्य-कारण-भावः कल्प्यते तेषां -

**द्रव्यं द्रव्यस्य हेतुः स्यादन्यदन्यस्य चैव हि ।**

**द्रव्यत्वमन्यभावो वा धर्माणां नोपपद्यते ।। ४.५३ ।।**

**द्रव्यं** **द्रव्यस्य** **अन्यस्य** **अन्यद्** **हेतुः** कारणं स्यात्। न तु तस्यैव तत्।

नाप्यद्रव्यं कस्यचित् कारणं स्वतन्त्रं दृष्टं लोके।

**न** च **द्रव्यत्वं** **धर्माणाम्** आत्मनाम् **उपपद्यते**।

**अन्यत्वं** **वा** कुतश्चिद्, येन अन्यस्य कारणत्वं कार्यत्वं वा प्रतिपद्येत।

अतः अद्रव्यत्वादनन्यत्वाच्च न कस्यचित्कार्यं कारणं वा आत्मेत्यर्थः।। ४.५३ ।।

**एवं न चित्तजा धर्माश्चित्तं वापि न धर्मजम् ।**

**एवं हेतुफलाजातिं प्रविशन्ति मनीषिणः ।। ४.५४ ।।**

**एवं** यथोक्तेभ्यो हेतुभ्यः आत्म-विज्ञान-स्वरूपमेव चित्तमिति, **न** **चित्तजाः** बाह्य-**धर्माः**, **नापि** बाह्य-**धर्मजं** **चित्तम्**। विज्ञान-स्वरूपाभास-मात्रत्वात् सर्व-धर्माणाम्।

एवं न हेतोः फलं जायते, नापि फलाद्धेतुरिति हेतुफलयोरजातिं **हेतुफलाजातिं** **प्रविशन्ति** अध्यवस्यन्ति।

आत्मनि हेतु-फलयोरभावमेव प्रतिपद्यन्ते ब्रह्मविदः इत्यर्थः।। ४.५४।।

ये पुनर्हेतुफलयोरभिनिविष्टाः तेषां किं स्यात् इत्युच्यते -

**यावद्धेतुफलावेशस्तावद्धेतुफलोद्भवः ।**

**क्षीणे हेतुफलावेशे नास्ति हेतुफलोद्भवः।। ४.५५ ।।**

धर्माधर्माख्यस्य हेतोः अहं कर्ता, मम धर्माधर्मौ, तत्फलं कालान्तरे क्वचित् प्राणि-निकाये जातो भोक्ष्ये इति -

**यावद्धेतुफलयोरावेशः** हेतुफलाग्रहः आत्मन्यध्यारोपणम्, तच्चित्ततेत्यर्थः।

**तावद्धेतुफलयोरुद्भवः** धर्माधर्मयोस्तत्फलस्य चानुच्छेदेन प्रवृत्तिः इत्यर्थः।

यदा पुनर्मन्त्रौषधि-वीर्येण इव ग्रहावेशो यथोक्ताद्वैत-दर्शनेन अविद्योद्भूत-हेतु-फलावेशोऽपनीतो भवति, तदा

तस्मिन् **क्षीणे नास्ति हेतुफलोद्भवः**।। ४.५५ ।।

यदि हेतुफलोद्भवः, तदा को दोषः इत्युच्यते -

**यावद्धेतुफलावेशः संसारस्तावदायतः ।**

**क्षीणे हेतुफलावेशे संसारं न प्रपद्यते ।। ४.५६ ।।**

**यावत्** सम्यग्दर्शनेन **हेतुफलावेशः** न निवर्तते अक्षीणः **संसारः** **तावद्** **आयतः** दीर्घो भवतीत्यर्थः।

**क्षीणे** पुनः **हेतुफलावेशे** **संसारं** **न** **प्रपद्यते**, कारणाभावात्।। ४.५६ ।।

ननु अजादात्मनोऽन्यन्नास्त्येव, तत्कथं हेतुफलयोः संसारस्य च उत्पत्ति-विनाशावुच्येते त्वया श्रृणु -

**संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै ।**

**सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै ।। ४.५७ ।।**

**संवृत्या** संवरणं संवृतिः अविद्या-विषयो लौकिको व्यावहारः, तया संवृत्या **जायते** **सर्वम्**।

**तेन** अविद्या-विषये **शाश्वतं** नित्यं **नास्ति** **वै**।

अतः उत्पत्ति-विनाश-लक्षणः संसारः आयतः इत्युच्यते।

परमार्थ-**सद्भावेन** तु **अजं** **सर्वम्** आत्मैव यस्मात्।

अतो जात्यभावाद् **उच्छेदः** **तेन** **नास्ति** **वै** कस्यचिद्धेतुफलादेरित्यर्थः।। ४.५७ ।।

**धर्मा य इति जायन्ते जायन्ते ते न तत्त्वतः ।**

**जन्म मायोपमं तेषां सा च माया न विद्यते ।। ४.५८ ।।**

**ये** अप्यात्मानोऽन्ये च **धर्माः** **जायन्ते** **इति** कल्प्यन्ते, **ते** इति एवंप्रकारा यथोक्ता संवृतिः निर्दिश्यत इति।

संवृत्यैव धर्मा जायन्ते।

**न** ते **तत्त्वतः** परमार्थतः **जायन्ते**।

यत्पुनस्तत्संवृत्या **जन्म** **तेषां** धर्माणां यथोक्तानां यथा मायया जन्म तथा तद् **मायोपमं** प्रत्येतव्यम्।

माया नाम वस्तु तर्हि। नैवम्, **सा** **च** **माया** **न** **विद्यते**। मायेत्यविद्यमानस्य आख्येत्यभिप्रायः।। ४.५८ ।।

कथं मायोपमं तेषां धर्माणां जन्मेति, आह -

**यथा मायामयाद् बीजाज्जायते तन्मयोऽङ्कुरः ।**

**नासौ नित्यो न चोच्छेदी तद्वद्धर्मेषु योजना ।। ४.५९ ।।**

**यथा** **मायामयाद्** आम्रादि-**बीजात्** **जायते** **तन्मयः** मायामयः **अङ्कुरः**।

**नासौ** अङ्कुरो **नित्यः**, **न** **च** **उच्छेदी** विनाशी वा अभूतत्वात्।

**तद्वद्** एव **धर्मेषु** जन्म-नाशादि-**योजना** युक्तिः।

न तु परमार्थतो धर्माणां जन्म नाशो वा युज्यत इत्यर्थः।। ४.५९ ।।

**नाजेषु सर्वधर्मेषु शाश्वताऽशाश्वताऽभिधा ।**

**यत्र वर्णा न वर्तन्ते विवेकस्तत्र नोच्यते ।। ४.६० ।।**

परमार्थतस्त्वात्मसु **अजेषु** नित्यैक-रस-विज्ञप्ति-मात्र-सत्ताकेषु **शाश्वतः** **अशाश्वतः** इति वा **न** **अभिधा**।

नाभिधानं प्रवर्तत इत्यर्थः।

**यत्र** येषु वर्ण्यन्ते यैरर्थाः ते **वर्णाः** शब्दाः **न** **वर्तन्ते**, अभिधातुं प्रकाशयितुं न प्रवर्तन्त इत्यर्थः।

इदमेवमिति **विवेकः** विविक्तता **तत्र** नित्योऽनित्य इति **नोच्यते**।

यतो वाचो निवर्तन्ते (तै. २.४.१) इति श्रुतेः।। ४.६० ।।

**यथा स्वप्ने द्वयाभासं चित्तं चलति मायया ।**

**तथा जाग्रद्द्वयाभासं चित्तं चलति मायया ।। ४.६१ ।।**

**अद्वयं च द्वयाभासं चित्तं स्वप्ने न संशयः ।**

**अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ।। ४.६२ ।।**

यत्पुनर्वाग्गोचरत्वं परमार्थतः अद्वयस्य विज्ञानमात्रस्य, तन्मनसः स्पन्दनमात्रम्, न परमार्थतः इति।

उक्तार्थौ श्लोकौ।। ४.६१-६२ ।।

इतश्च वाग्गोचरस्याभावो द्वैतस्य -

**स्वप्नदृक् प्रचरन्स्वप्ने दिक्षु वै दशसु स्थितान् ।**

**अण्डजान्स्वेदजान्वापि जीवान्पश्यति यान्सदा ।। ४.६३ ।।**

स्वप्नान् पश्यतीति **स्वप्नदृक्** **प्रचरन्** पर्यटन् **स्वप्ने** स्वप्न-स्थाने **दिक्षु** **वै** **दशसु** **स्थितान्** वर्तमानान् **जीवान्** प्राणिनः **अण्डजान्** **स्वेदजान्** **वा** **यान्** **सदा** **पश्यति** इति।। ४.६३।।

यद्येवम्, ततः किम् उच्यते -

**स्वप्नदृक्चित्तदृश्यास्ते न विद्यन्ते ततः पृथक् ।**

**तथा तद्दृश्यमेवेदं स्वप्नदृक्चित्तमिष्यते ।। ४.६४ ।।**

स्वप्नदृशः चित्तं **स्वप्नदृक्चित्त**म्।

तेन **दृश्याः** **ते** जीवाः **ततः** तस्मात् स्वप्नदृक्चित्तात् **पृथक्** **न** **विद्यन्ते** न सन्तीत्यर्थः।

चित्तमेव ह्यनेक-जीवादि-भेदाकारेण विकल्प्यते।

**तथा** तदपि स्वप्नदृक्चित्तम् **इदं** **तद्दृश्यमेव** तेन स्वप्नदृशा दृश्यं तद्दृश्यम्।

अतः स्वप्नदृग्व्यतिरेकेण चित्तं नाम नास्तीत्यर्थः।। ४.६४ ।।

**चरञ्जागरिते जाग्रद्दिक्षु वै दशसु स्थितान् ।**

**अण्डजान्स्वेदजान्वापि जीवान्पश्यति यान्सदा ।। ४.६५ ।।**

**जाग्रच्चित्तेक्षणीयास्ते न विद्यन्ते ततः पृथक् ।**

**तथा तद्दृश्यमेवेदं जाग्रतश्चित्तमिष्यते ।। ४.६६ ।।**

जाग्रतो दृश्या जीवाः तच्चित्ताव्यतिरिक्ताः चित्तेक्षणीयत्वात् स्वप्न-दृक्-चित्तेक्षणीय-जीववत्।

तच्च जीवेक्षणात्मकं चित्तं द्रष्टुरव्यतिरिक्तं द्रष्टृ-दृश्यत्वात् स्वप्न-चित्तवत्। उक्तार्थमन्यत्।। ४.६५-६६ ।।

**उभे ह्यन्योन्यदृश्ये ते किं तदस्तीति चोच्यते ।**

**लक्षणाशून्यमुभयं तन्मते नैव गृह्यते ।। ४.६७ ।।**

जीवचित्ते **उभे** चित्त-चैत्त्ये **ते** **अन्योन्यदृश्ये** इतरेतर-गम्ये। जीवादि-विषयापेक्षं हि चित्तं नाम भवति।

चित्तापेक्षं हि जीवादि दृश्यम्। अतस्ते अन्योन्य-दृश्ये। तस्मान्न किञ्चिदस्तीति चोच्यते चित्तं वा चित्तेक्षणीयं वा।

**किं** **तदस्तीति** विवेकिना **उच्यते**। न हि स्वप्ने हस्ती हस्ति-चित्तं वा विद्यते।

तथा इहापि विवेकिनामित्यभिप्रायः। कथम् **लक्षणाशून्यं** लक्ष्यते अनयेति लक्षणा प्रमाणम्।

प्रमाण-शून्यम् **उभयं** चित्तं चैत्त्यं द्वयं यतः, **तन्मतेन** **एव** तच्चित्ततयैव तद् **गृह्यते**।

न हि घटमतिं प्रत्याख्याय घटो गृह्यते, नापि घटं प्रत्याख्याय घटमतिः।

न हि तत्र प्रमाण-प्रमेय-भेदः शक्यते कल्पयितुम् इत्यभिप्रायः।। ४.६७ ।।

**यथा स्वप्नमयो जीवो जायते म्रियतेऽपि च ।**

**तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ।। ४.६८ ।।**

**यथा मायामयो जीवो जायते म्रियतेऽपि च ।**

**तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ।। ४.६९ ।।**

**यथा निर्मितको जीवो जायते म्रियतेऽपि च ।**

**तथा जीवा अमी सर्वे भवन्ति न भवन्ति च ।। ४.७० ।।**

**मायामयः** मायाविना यः कृतो **निर्मितकः** मन्त्रौषध्यादिभिर्निष्पादितः।

स्वप्न-माया-निर्मितका अण्डजादयो जीवाः यथा जायन्ते म्रियन्ते च, तथा मनुष्यादि-लक्षणा अविद्यमाना एव

चित्त-विकल्पना-मात्रा इत्यर्थः।। ४.६८-७० ।।

**न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते ।**

**एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ।। ४.७१ ।।**

व्यवहार-सत्य-विषये जीवानां जन्म-मरणादिः स्वप्नादि-जीववद् इत्युक्तम्।

**उत्तमं** तु परमार्थ-**सत्यं** **न** **कश्चिज्जायते** **जीवः** इति। उक्तार्थमन्यत्।। ४.७१ ।।

**चित्तस्पन्दितमेवेदं ग्राह्यग्राहकवद् द्वयम् ।**

**चित्तं निर्विषयं नित्यमसङ्गं तेन कीर्तितम् ।। ४.७२ ।।**

सर्वं **ग्राह्य-ग्राहकवत्** **चित्त-स्पन्दितमेव** **द्वयम्**। **चित्तं** परमार्थत आत्मैवेति **निर्विषयम्**।

**तेन** निर्विषयत्वेन **नित्यम्** **असङ्गं** **कीर्तितम्**। असङ्गो ह्यं पुरुषः (बृ. ४.३.१५, १६) इति श्रुतेः।

सविषयस्य हि विषये सङ्गः। निर्विषयत्वाच्चित्तमसङ्गमित्यर्थः।। ४.७२ ।।

ननु निर्विषयत्वेन चेदसङ्गत्वम्, चित्तस्य न निःसङ्गता भवति।

यस्मात् शास्ता शास्त्रं शिष्यः चेत्येवमादेर्विषयस्य विद्यमानत्वात्। नैष दोषः। कस्मात्

**योऽस्ति कल्पितसंवृत्या परमार्थेन नास्त्यसौ ।**

**परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः ।। ४.७३ ।।**

**यः** पदार्थः शास्त्रादिर्विद्यते, स **कल्पितसंवृत्या**। कल्पिता च सा परमार्थ-प्रतिपत्त्युपायत्वेन संवृतिश्च सा, तया

योऽस्ति, **परमार्थेन** **नास्त्यसौ** न विद्यते। ज्ञाते द्वैतं न विद्यते (का. १.१८) इत्युक्तम्।

यश्च **परतन्त्राभिसंवृत्या** परशास्त्र-व्यवहारेण **स्यात्** पदार्थः, स **परमार्थतो** निरूप्यमाणो **नास्त्येव**।

तेन युक्तमुक्तम्, असङ्गं तेन कीर्तितम् (का. ४.७२) इति।। ४.७३ ।।

**अजः कल्पितसंवृत्या परमार्थेन नाप्यजः ।**

**परतन्त्राभिनिष्पत्त्या संवृत्या जायते तु सः ।। ४.७४ ।।**

ननु शास्त्रादीनां संवृतित्वे अज इतीयमपि कल्पना संवृतिः स्यात्। सत्यमेवम्।

शास्त्रादि-**कल्पितसंवृत्या** एव **अजः** इत्युच्यते। **परमार्थेन** **नाप्यजः**।

यस्मात् **परतन्त्राभिनिष्पत्त्या** पर-शास्त्र-सिद्धिमपेक्ष्य यः अज इत्युक्तः, **सः** **संवृत्या** **जायते**।

अतः अज इतीयमपि कल्पना परमार्थ-विषये नैव क्रमत इत्यर्थः।। ४.७४ ।।

**अभूताभिनिवेशोऽस्ति द्वयं तत्र न विद्यते ।**

**द्वयाभावं स बुद्ध्वैव निर्निमित्तो न जायते ।। ४.७५ ।।**

यस्मादसद्विषयः, तस्माद् **अ**सत्य**भूते** द्वैते **अभिनिवेशोऽस्ति** केवलम्। अभिनिवेशः आग्रहमात्रम्।

**द्वयं** **तत्र** **न** **विद्यते**।

मिथ्याभिनिवेशमात्रं च जन्मनः कारणं यस्मात्, तस्मात् **द्वयाभावं** **बुद्ध्वा** **निर्निमित्तः** निवृत्त-मिथ्या-

द्वयाभिनिवेशः यः, सः **न** **जायते**।। ४.७५ ।।

**यदा न लभते हेतूनुत्तमाधममध्यमान् ।**

**तदा न जायते चित्तं हेत्वभावे फलं कुतः ।। ४.७६ ।।**

जात्याश्रम-विहिता आशीर्वर्जितैरनुष्ठीयमाना धर्मा देवत्वादि-प्राप्ति-हेतव उत्तमाः केवलाश्च।

धर्माः अधर्मव्यामिश्रा मनुष्यत्वादि-प्राप्त्यर्था मध्यमाः।

तिर्यगादि-प्राप्ति-निमित्ता अधर्म-लक्षणाः प्रवृत्ति-विशेषा चाधमाः।

तान् **उत्तम-मध्यमाधमान्** अविद्या-परिकल्पितान् **यदा** एकमेवाद्वितीयमात्मतत्त्वं सर्वकल्पनावर्जितं जानन् **न लभते** न पश्यति, यथा बालैर्दृश्यमानं गगने मलं विवेकी न पश्यति तद्वत्, **तदा** **न** **जायते** नोत्पद्यते **चित्तं** देवाद्याकारैः उत्तमाधममध्यफलरूपेण।

न ह्यसति हेतौ फलमुत्पद्यते बीजाद्यभाव इव सस्यादि।। ४.७६ ।।

हेत्वभावे चित्तं नोत्पद्यत इति हि उक्तम्। सा पुनरनुत्पत्तिः चित्तस्य कीदृशीत्युच्यते -

**अनिमित्तस्य चित्तस्य याऽनुत्पत्तिः समाऽद्वया ।**

**अजातस्यैव सर्वस्य चित्तदृश्यं हि तद्यतः ।। ४.७७ ।।**

परमार्थ-दर्शनेन निरस्त-धर्माधर्माख्योत्पत्ति-निमित्तस्य **अनिमित्तस्य** **चित्तस्य** इति **या** मोक्षाख्या **अनुत्पत्तिः**,

सा सर्वदा सर्वावस्थासु **समा** निर्विशेषा **अद्वया** च।

पूर्वमपि **अजातस्यैव** अनुत्पन्नस्य चित्तस्य **सर्वस्य** अद्वयस्येत्यर्थः।

यस्मात् प्रागपि विज्ञानात् चित्त-दृश्यं तद्द्वयं जन्म च, तस्मादजातस्य सर्वस्य सर्वदा चित्तस्य समा अद्वयैव

अनुत्पत्तिः।

न पुनः कदाचिद् भवति, कदाचिद्वा न भवति। सर्वदा एकरूपैवेत्यर्थः।। ४.७७ ।।

**बुद्ध्वाऽनिमित्ततां सत्यां हेतुं पृथगनाप्नुवन् ।**

**वीतशोकं तथाऽकाममभयं पदमश्नुते ।। ४.७८ ।।**

यथोक्तेन न्यायेन जन्म-निमित्तस्य द्वयस्य अभावाद् **अनिमित्ततां** च **सत्यां** परमार्थरूपां **बुद्ध्वा** **हेतुं** धर्मादि-कारणं देवादि-योनि-प्राप्तये **पृथगनाप्नुवन्** अनुपाददानः त्यक्त-बाह्यैषणः सन् **काम**-**शोकादि**-**वर्जितम्** अविद्यादि-रहितम् **अभयं** **पदम्** **अश्नुते**। पुनर्न जायत इत्यर्थः।। ४.७८ ।।

**अभूताभिनिवेशाद्धि सदृशे तत्प्रवर्तते ।**

**वस्त्वभावं स बुद्ध्वैव निःसङ्गं विनिवर्तते ।। ४.७९ ।।**

यस्माद् **अभूताभिनिवेशात्** असति द्वये द्वयास्तित्व-निश्चयः अभूताभिनिवेशः, तस्माद् अविद्या-व्यामोह-रूपाद् **हि** **सदृशे** तदनुरूपे **तत्** चित्तं **प्रवर्तते**। तस्य द्वयस्य **वस्तुनः** **अभावं** यदा **बुद्धवान्**, तदा तस्माद् **निःसङ्गं**

निरपेक्षं सद् **विनिवर्तते** अभूताभिनिवेश-विषयात्।। ४.७९ ।।

**निवृत्तस्याप्रवृत्तस्य निश्चला हि तदा स्थितिः ।**

**विषयः स हि बुद्धानां तत्साम्यमजमद्वयम् ।। ४.८० ।।**

**निवृत्तस्य** द्वैत-विषयात्, विषयान्तरे च **अप्रवृत्तस्य** अभाव-दर्शनेन चित्तस्य **निश्चला** चलन-वर्जिता ब्रह्म-स्वरूपैव **तदा** **स्थितिः**। यैषा ब्रह्मस्वरूपा स्थितिः चित्तस्य अद्वय-विज्ञानैक-रस-घन-लक्षणा, **स** **हि** यस्माद् **विषयः** गोचरः परमार्थ-दर्शिनां **बुद्धानाम्**, तस्मात् **तत्साम्यं** परं निर्विशेषम् **अजमद्वयं** च।। ४.८० ।।

पुनरपि कीदृशश्चासौ बुद्धानां विषय इत्याह -

**अजमनिद्रमस्वप्नं प्रभातं भवति स्वयम् ।**

**सकृद्विभातो ह्येवैष धर्मो धातुस्वभावतः ।। ४.८१ ।।**

**स्वयम्** एव तत् **प्रभातं** **भवति** न आदित्याद्यपेक्षम्। स्वयं-ज्योति:स्वभावमित्यर्थ:। **सकृद्विभात:** सदैव विभात इत्येतत्। एष: एवंलक्षण: आत्माख्यो **धर्म:** **धातु-स्वभावत:** वस्तु-स्वभावत इत्यर्थ:।। ४.८१ ।।

एवं (बहुश:) उच्यमानमपि परमार्थ-तत्त्वं कस्माद् लौकिकैर्न गृह्यते इत्युच्यते -

**सुखमाव्रियते नित्यं दु:खं विव्रियते सदा ।**

**यस्य कस्य च धर्मस्य ग्रहेण भगवानसौ ।। ४.८२ ।।**

यस्माद् **यस्य** **कस्य**चित् द्वय-वस्तुनो **धर्मस्य** **ग्रहेण** ग्रहणावेशेन मिथ्याभिनिविष्टतया **सुखमाव्रियते** अनायासेन आच्छाद्यत इत्यर्थ:। द्वयोपलब्धि-निमित्तं हि तत्रावरणं न यत्नान्तरमपेक्षते। **दु:खं** च **विव्रियते** प्रकटीक्रियते। परमार्थ-ज्ञानस्य दुर्लभत्वात्। **भगवानसौ** आत्माऽद्वयो देव इत्यर्थ:।

अतो वेदान्तैराचार्यैश्च बहुश उच्यमानोऽपि नैव ज्ञातुं शक्य इत्यर्थ:।

आश्चर्यो वक्ता कुशलोऽस्य लब्धा (कठ. १.२.७) इति श्रुते:।। ४.८२ ।।

अस्ति नास्तीत्यादि-सूक्ष्म-विषया अपि पण्डितानां ग्रहाः भगवतः परमात्मन आवरणा एव।

किमुत मूढ-जनानां बुद्धि-लक्षणा इत्येवमर्थं प्रदर्शयन्नाह -

**अस्ति नास्त्यस्ति नास्तीति नास्ति नास्तीति वा पुनः ।**

**चलस्थिरोभयाभावैरावृणोत्येव बालिशः ।। ४.८३ ।।**

अस्तीति। **अस्ति** आत्मेति वादी कश्चित् प्रतिपद्यते। **नास्ति** इत्यपरो वैनाशिकः।

**अस्ति** **नास्ति** इत्यपरोऽर्धवैनाशिकः सदसद्वादी दिग्वासाः। नास्ति नास्ति इत्यत्यन्त-शून्यवादी।

तत्र अस्ति-भावः **चलः**, घटाद्यनित्य-विलक्षणत्वात्। नास्ति-भावः **स्थिरः**, सदाविशेषत्वात्।

**उभयं** चल-स्थिर-विषयत्वात् सदसद्भावः। **अभावः** अत्यन्ताभावः। प्रकार-चतुष्टयस्यापि तैरेतैः **चलस्थिरोभयाभावैः** सदसदादिवादी सर्वोऽपि भगवन्तम् **आवृणोत्येव** **बालिशः** अविवेकी। यद्यपि पण्डितो बालिश एव परमार्थ-तत्त्वानवबोधात्, किमु स्वभाव-मूढो जनः इत्यभिप्रायः।। ४.८३ ।।

कीदृक्पुनः परमार्थ-तत्त्वम्, यदवबोधादबालिशः पण्डितो भवतीत्याह -

**कोट्यश्चतस्र एतास्तु ग्रहैर्यासां सदाऽऽवृतः ।**

**भगवानाभिरस्पृष्टो येन दृष्टः स सर्वदृक् ।। ४.८४ ।।**

**कोट्यः** प्रावादुक-शास्त्र-निर्णयान्ताः एताः उक्ता अस्ति नास्तीत्याद्याः **चतस्र**ः, **यासां** कोटीनां **ग्रहैः** ग्रहणैः उपलब्धि-निश्चयैः **सदा** सर्वदा **आवृतः** आच्छादितः तेषामेव प्रावादुकानां यः, स **भगवान्** **आभिः** अस्तिनास्तीत्यादि-कोटिभिः चतसृभिरपि **अस्पृष्टः** अस्त्यादि-विकल्पना-वर्जित इत्येतत्।

**येन** मुनिना **दृष्टः** ज्ञातः वेदान्तेषु औपनिषदः पुरुषः, **सः** **सर्वदृक्** सर्वज्ञः परमार्थ-पण्डित इत्यर्थः।। ४.८४ ।।

**प्राप्य सर्वज्ञतां कृत्स्नां ब्राह्मण्यं पदमद्वयम् ।**

**अनापन्नादिमध्यान्तं किमतः परमीहते ।। ४.८५ ।।**

**प्राप्य** एतां यथोक्तां कृत्स्नां समस्तां **सर्वज्ञतां** **ब्राह्मण्यं** **पदम्** स ब्राह्मणः (बृ. ३.८.१०) एष नित्यो महिमा

ब्राह्मणस्य (बृ. ४.४.२३) इति श्रुतेः।

आदिमध्यान्ताः उत्पत्ति-स्थिति-लयाः अनापन्ना अप्राप्ता यस्य अद्वयस्य पदस्य न विद्यन्ते तद् **अनापन्नादिमध्यान्तं**

ब्राह्मण्यं पदम्।

तदेव प्राप्य लब्ध्वा **किम्** **अतः** परम् अस्मादात्म-लाभादूर्ध्वम् **ईहते** चेष्टते, निष्प्रयोजनमित्यर्थः।

नैव तस्य कृतोनार्थः (भ.गी. ३.१८) इत्यादि-स्मृतेः।। ४.८५ ।।

**विप्राणां विनयो ह्येष शमः प्राकृत उच्यते ।**

**दमः प्रकृतिदान्तत्वादेवं विद्वाञ्शमं व्रजेत् ।। ४.८६ ।।**

**विप्राणां** ब्राह्मणानां **विनयः** विनीतत्वं स्वाभाविकं यदेतद् आत्म-स्वरूपेणावस्थानम्।

एषः विनयः **शमः** अपि। एष एव **प्राकृतः** स्वाभाविकः अकृतकः **उच्यते**।

दमः अप्येष एव **प्रकृतिदान्तत्वात्** स्वभावत एव चोपशान्त-रूपत्वाद् ब्रह्मणः।

**एवं** यथोक्तं स्वभावोपशान्तं ब्रह्म **विद्वान्** **शमम्** उपशान्तिं स्वाभाविकीं ब्रह्म-स्वरूपां **व्रजेत्** ब्रह्म-स्वरूपेणावतिष्ठत इत्यर्थः।। ४.८६ ।।

एवमन्योन्य-विरुद्धत्वात् संसार-कारणानि राग-द्वेष-दोषास्पदानि प्रावादुकानां दर्शनानि।

अतो मिथ्या-दर्शनानि तानीति तद्युक्तिभिरेव दर्शयित्वा चतुष्कोटि-वर्जितत्वाद् रागादि-दोषानास्पदं स्वभाव-शान्तमद्वैतदर्शनमेव सम्यग्दर्शनमिति उपसंहृतम्। अथेदानीं स्व-प्रक्रिया-प्रदर्शनार्थ आरम्भः -

**सवस्तु सोपलम्भं च द्वयं लौकिकमिष्यते ।**

**अवस्तु सोपलम्भं च शुद्धं लौकिकमिष्यते ।। ४.८७ ।।**

**सवस्तु** संवृतिसता वस्तुना सह वर्तत इति सवस्तु। तथा च उपलब्धिरुपलम्भः, तेन सह वर्तत इति **सोपलम्भं** **च** शास्त्रादि-सर्व-व्यवहारास्पदं ग्राह्य-ग्राहक-लक्षणं **द्वयं** **लौकिकं** लोकादनपेतं लौकिकं जागरितमित्येतत्। एवं-लक्षणं जागरितम् **इष्यते** वेदान्तेषु। **अवस्तु** संवृतेरप्यभावात्।

सोपलम्भं वस्तुवद् उपलम्भनमुपलम्भः। असत्यपि वस्तुनि, तेन सह वर्तत इति **सोपलम्भं** **च**। **शुद्धं** केवलं

प्रविभक्तं जागरितात् स्थूलाद् **लौकिकं** सर्व-प्राणि-साधाराणत्वाद् **इष्यते** स्वप्न इत्यर्थः।। ४.८७।।

**अवस्त्वनुपलम्भं च लोकोत्तरमिति स्मृतम् ।**

**ज्ञानं ज्ञेयं च विज्ञेयं सदा बुद्धैः प्रकीर्तितम् ।। ४.८८ ।।**

**अवस्त्वनुपलम्भं** **च** ग्राह्य-ग्रहण-वर्जितमित्येतत्। **लोकोत्तरम्**, अत एव लोकातीतम्।

ग्राह्य-ग्रहण-विषयो हि लोकः। तदभावात् सर्व-प्रवृत्ति-बीजं सुषुप्तमित्येतद् एवं **स्मृतम्**।

सोपायं परमार्थ-तत्त्वं लौकिकं, शुद्धलौकिकं, लोकोत्तरं च क्रमेण येन ज्ञानेन ज्ञायते, तद् **ज्ञानम्**।

**ज्ञेयं** एतान्येव त्रीणि। एतद्व्यतिरेकेण ज्ञेयानुपपत्तेः। सर्व-प्रावादुक-कल्पित-वस्तुनः अत्रैव अन्तर्भावात्।

**विज्ञेयं** यत्परमार्थसत्यं तुर्याख्यमद्वयमजमात्म-तत्त्वम् इत्यर्थः।

**सदा** सर्वदा एतद् लौकिकादि-विज्ञेयान्तं **बुद्धैः** परमार्थ-दर्शिभिर्ब्रह्मविद्भिः **प्रकीर्तितम्**।। ४.८८ ।।

**ज्ञाने च त्रिविधे ज्ञेये क्रमेण विदिते स्वयम् ।**

**सर्वज्ञता हि सर्वत्र भवतीह महाधियः ।। ४.८९ ।।**

**ज्ञाने** च लौकिकादि-विषये। **ज्ञेये** **च** लौकिकादौ **त्रिविधे** -- पूर्वं लौकिकं स्थूलम्, तदभावेन पश्चाच्छुद्धं लौकिकम्, तदभावेन लोकोत्तरम् इत्येवं -- **क्रमेण** स्थान-त्रयाभावेन परमार्थ-सत्ये तुर्येऽद्वयेऽजेऽभये **विदिते**, **स्वयम्** एव आत्म-स्वरूपमेव **सर्वज्ञता** सर्वश्चासौ ज्ञश्च सर्वज्ञः, तद्भावः **सर्वज्ञता** **इह** अस्मिन् लोके **भवति** **महाधियः** महाबुद्धेः।

सर्व-लोकातिशय-वस्तु-विषय-बुद्धित्वादेवंविदः **सर्वत्र** सर्वदा भवति। सकृद्विदिते स्वरूपे व्यभिचाराभावादित्यर्थः।

न हि परमार्थविदो ज्ञानोद्भवाभिभवौ स्तः, यथा अन्येषां प्रावादुकानाम्।। ४.८९ ।।

लौकिकादीनां क्रमेण ज्ञेयत्वेन निर्देशादस्तित्वाशङ्का परमार्थतो मा भूदित्याह -

**हेयज्ञेयाप्यपाक्यानि विज्ञेयान्यग्रयाणतः ।**

**तेषामन्यत्र विज्ञेयादुपलम्भस्त्रिषु स्मृतः ।। ४.९० ।।**

**हेयानि** च लौकिकादीनि त्रीणि जागरित-स्वप्न-सुषुप्तानि आत्मन्यसत्त्वेन रज्ज्वां सर्पवद् हातव्यानीत्यर्थः।

**ज्ञेयम्** इह चतुष्कोटि-वर्जितं परमार्थ-तत्त्वम्। **आप्यानि** आप्तव्यानि त्यक्त-बाह्यैषणा-त्रयेण भिक्षुणा पाण्डित्य-बाल्य-मौनाख्यानि साधनानि। **पाक्यानि** राग-द्वेष-मोहादयो दोषाः कषायाख्यानि पक्तव्यानि। सर्वाण्येतानि **हेयज्ञेयाप्यपाक्यानि** **विज्ञेयानि** भिक्षुणा उपायत्वेनेत्यर्थः। **अग्रयाणतः** प्रथमतः। **तेषां** हेयादीनाम् **अन्यत्र** **विज्ञेयात्** परमार्थसत्यं विज्ञेयं ब्रह्मैकं वर्जयित्वा, उपलम्भनम् **उपलम्भः** अविद्या-कल्पना-मात्रम्। हेयाप्यपाक्येषु **त्रिषु** अपि **स्मृतः** ब्रह्मविद्भिः न परमार्थ-सत्यता त्रयाणामित्यर्थः।। ४.९० ।।

**प्रकृत्याकाशवज्ज्ञेयाः सर्वे धर्मा अनादयः ।**

**विद्यते न हि नानात्वं तेषां क्वचन किञ्चन ।। ४.९१ ।।**

परमार्थतस्तु **प्रकृत्या** स्वभावतः **आकाशवत्** आकाश-तुल्याः सूक्ष्म-निरञ्जन-सर्वगतत्वैः **सर्वे** **धर्माः** आत्मानो **ज्ञेयाः** मुमुक्षुभिः **अनादयः** नित्याः।

बहुवचन-कृत-भेदाशङ्कां निराकुर्वन्नाह - **क्वचन** **किञ्चन** किञ्चिद् अणुमात्रमपि **तेषां** **न** **विद्यते** **नानात्वम्** इति।। ४.९१ ।।

ज्ञेयतापि धर्माणां संवृत्यैव, न परमार्थत इत्याह -

**आदिबुद्धाः प्रकृत्यैव सर्वे धर्माः सुनिश्चिताः ।**

**यस्यैवं भवति क्षान्तिः सोऽमृतत्वाय कल्पते ।। ४.९२ ।।**

यस्माद् आदौ बुद्धाः **आदिबुद्धाः** **प्रकृत्यैव** स्वभावत एव यथा नित्य-प्रकाश-स्वरूपः सविता, एवं नित्य-बोध-स्वरूपा इत्यर्थः। **सर्वे** **धर्माः** सर्व आत्मानः। न च तेषां निश्चयः कर्तव्यः नित्य-**निश्चित**-**स्वरूपाः** इत्यर्थः। न सन्दिह्यमान-स्वरूपा एवं नैवं वेति।

**यस्य** मुमुक्षोः **एवं** यथोक्त-प्रकारेण सर्वदा बोध-निश्चय-निरपेक्षता आत्मार्थं परार्थं वा, यथा सविता नित्यं प्रकाशान्तर-निरपेक्षः स्वार्थं परार्थं चेत्येवं भवति **क्षान्तिः** बोध-कर्तव्यता-निरपेक्षता सर्वदा स्वात्मनि, **सः** **अमृतत्वाय** अमृत-भावाय **कल्पते**। मोक्षाय समर्थो भवतीत्यर्थः।। ४.९२ ।।

तथा नापि शान्ति-कर्तव्यता आत्मनीत्याह -

**आदिशान्ता ह्यनुत्पन्नाः प्रकृत्यैव सुनिर्वृताः ।**

**सर्वे धर्माः समाभिन्ना अजं साम्यं विशारदम् ।। ४.९३ ।।**

यस्माद् **आदिशान्ताः** नित्यमेव शान्ताः **अनुत्पन्नाः** अजाः च **प्रकृत्यैव** **सुनिर्वृताः** सुष्ठूपरत-स्वभावाः इत्यर्थः।

**सर्वे** **धर्माः** समाश्च अभिन्नाश्च **समाभिन्नाः** **अजं** **साम्यं** **विशारदं** विशुद्धमात्म-तत्त्वं यस्मात्, तस्मात्

शान्तिर्मोक्षो वा नास्ति कर्तव्य इत्यर्थः। न हि नित्यैक-स्वभावस्य कृतं किञ्चिद् अर्थवत्स्यात्।। ४.९३ ।।

ये यथोक्तं परमार्थ-तत्त्वं प्रतिपन्नाः, ते एव अकृपणाः लोके, कृपणा एवान्ये, इत्याह -

**वैशारद्यं तु वै नास्ति भेदे विचरतां सदा ।**

**भेदनिम्नाः पृथग्वादास्तस्मात्ते कृपणाः स्मृताः ।। ४.९४ ।।**

यस्माद् **भेदनिम्नाः** भेदानुयायिनः संसारानुगा इत्यर्थः।

के **पृथग्वादाः** पृथक् नाना वस्तु इत्येवं वदनं येषां ते पृथग्वादाः। द्वैतिन इत्यर्थः।

**तस्मात्** **ते** **कृपणाः** क्षुद्राः **स्मृताः**।

यस्माद् **वैशारद्यं** विशुद्धिः **नास्ति** तेषां **भेदे** **विचरतां** द्वैतमार्गे अविद्या-कल्पिते **सर्वदा** वर्तमानानामित्यर्थः।

अतो युक्तमेव तेषां कार्पण्यमित्यभिप्रायः।। ४.९४ ।।

यदिदं परमार्थ-तत्त्वम्, अमहात्मभिः अपण्डितैः वेदान्त-बहिष्ठैः क्षुद्रैरल्प-प्रज्ञैः अनवगाह्यम् इत्याह -

**अजे साम्ये तु ये केचिद् भविष्यन्ति सुनिश्चिताः ।**

**ते हि लोके महाज्ञानास्तच्च लोको न गाहते ।। ४.९५ ।।**

**अजे** **साम्ये** परमार्थ-तत्त्वे एवमेवेति **ये** **केचित्** स्त्र्यादयोऽपि **सुनिश्चिताः** **भविष्यन्ति** चेत्, **ते** एव **हि** **लोके** **महाज्ञानाः** निरतिशय-तत्त्व-विषय-ज्ञाना इत्यर्थः।

**तच्च** तेषां वर्त्म तेषां विदितं परमार्थ-तत्त्वं सामान्य-बुद्धिः अन्यो **लोको** **न** **गाहते** नावतरति।

न विषयीकरोतीत्यर्थः।

सर्वभूतात्मभूतस्य सर्वभूतहितस्य च। देवा अपि मार्गे मुह्यन्त्यपदस्य पदैषिणः।।

शकुनीनाम् इवाकाशे गतिर्नैवोपलभ्यते। (म.भा.शां. २३९.२३,२४) इत्यादि-स्मरणात्।। ४.९५ ।।

कथं महाज्ञानत्वमित्याह -

**अजेष्वजमसङ्क्रान्तं धर्मेषु ज्ञानमिष्यते ।**

**यतो न क्रमते ज्ञानमसङ्गं तेन कीर्तितम् ।। ४.९६ ।।**

**अजेषु** अनुत्पन्नेषु अचलेषु **धर्मेषु** आत्मसु **अजम्** अचलं च **ज्ञानमिष्यते** सवितरि इव औष्ण्यं प्रकाशश्च यतः, तस्माद् **असङ्क्रान्तम्** अर्थान्तरे ज्ञानम् अजम् इष्यते। **यस्मान्न** **क्रमते** अर्थान्तरे **ज्ञानम्**, **तेन** कारणेन **असङ्गं** तत् **कीर्तितम्**। आकाश-कल्पम् (का. ४.१) इत्युक्तम्।। ४.९६ ।।

**अणुमात्रेऽपि वैधर्म्ये जायमानेऽविपश्चितः ।**

**असङ्गता सदा नास्ति किमुतावरणच्युतिः ।। ४.९७ ।।**

इतोऽन्येषां वादिनाम् **अणुमात्रे** अल्पे **अपि** **वैधर्म्ये** वस्तुनि बहिरन्तर्वा **जायमाने** उत्पद्यमाने **अविपश्चितः** अविवेकिनः **असङ्गता** असङ्गत्वं **सदा** **नास्ति**। **किमुत** वक्तव्यम् **आवरण**-**च्युतिः** बन्ध-नाशो नास्तीति।।

तेषामावरण-च्युतिर्नास्तीति ब्रुवतां स्वसिद्धान्ते अभ्युपगतं तर्हि धर्माणामावरणम्। नेत्युच्यते -

**अलब्धावरणाः सर्वे धर्माः प्रकृतिनिर्मलाः ।**

**आदौ बुद्धास्तथा मुक्ता बुध्यन्त इति नायकाः ।। ४.९८ ।।**

**अलब्धावरणाः** अलब्धम् अप्राप्तम् आवरणम् अविद्यादि-बन्धनं येषां ते धर्माः अलब्धावरणाः।

बन्धन-रहिता इत्यर्थः। **प्रकृतिनिर्मलाः** स्वभाव-शुद्धाः।

**आदौ** **बुद्धाः** **तथा** **मुक्ताः**, यस्माद् नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावाः।

यद्येवं कथं तर्हि बुध्यन्ते इत्युच्यते **नायकाः** स्वामिनः समर्थाः बोद्धुम्। बोध-शक्तिमत्स्वभावा इत्यर्थः।

यथा नित्य-प्रकाश-स्वरूपोऽपि सविता प्रकाशत इत्युच्यते, यथा वा नित्य-निवृत्त-गतयोऽपि नित्यमेव शैलास्तिष्ठन्तीत्युच्यते, तद्वत्।। ४.९८ ।।

**क्रमते न हि बुद्धस्य ज्ञानं धर्मेषु तायिनः ।**

**सर्वे धर्मास्तथा ज्ञानं नैतद् बुद्धेन भाषितम् ।। ४.९९ ।।**

यस्माद् **न हि क्रमते बुद्धस्य** परमार्थदर्शिनो ज्ञानं विषयान्तरेषु धर्मेषु धर्म-संस्थं सवितरि इव प्रभा। **तायिनः**

तायोऽस्यास्तीति तायी, सन्तानवतो निरन्तरस्य आकाश-कल्पस्यत्यर्थः।

पूजावतो वा प्रज्ञावतो वा।

**सर्वे धर्माः** आत्मानोऽपि **तथा** ज्ञानवद् एव आकाश-कल्पत्वान्न क्रमन्ते क्वचिदप्यर्थान्तरे इत्यर्थः।

यदादावुपन्यस्तम् ज्ञानेनाकाशकल्पेन (का. ४.१) इत्यादि, तदिदम् आकाश-कल्पस्य तायिनो बुद्धस्य

तदनन्यत्वाद् आकाश-कल्पं ज्ञानं न क्रमते क्वचिदप्यर्थान्तरे।

तथा धर्माः इति। आकाशम् इव अचलमविक्रियं निरवयवं नित्यमद्वितीयमसङ्गमदृश्यमग्राह्यमशनायाद्यतीतं ब्रह्मात्म-तत्त्वम्। न हि द्रष्टुः दृष्टेः विपरिलापो विद्यते (बृ. ४.३.२३) इति श्रुतेः।

ज्ञान-ज्ञेय-ज्ञातृ-भेद-रहितं परमार्थ-तत्त्वमद्वयमेतन्न बुद्धेन भाषितम्।

यद्यपि बाह्यार्थ-निराकरणं ज्ञान-मात्र-कल्पना च अद्वयवस्तु-सामीप्यम् उक्तम्। इदं तु परमार्थ-तत्त्वमद्वैतं वेदान्तेष्वेव विज्ञेयमित्यर्थः।। ४.९९ ।।

शास्त्र-समाप्तौ परमार्थ-तत्त्व-स्तुत्यर्थं नमस्कार उच्यते -

**दुर्दर्शमतिगम्भीरं अजं साम्यं विशारदम्।**

**बुद्ध्वा पदम् अनानात्वं नमस्कुर्मः यथाबलम्।। ४.१००।।**

**दुर्दर्शं** दुःखेन दर्शनमस्येति दुर्दर्शम्। अस्ति नास्तीति चतुष्कोटि-वर्जिततत्वाद् दुर्विज्ञेयमित्यर्थः।

अत एव **अतिगम्भीरं** दुष्प्रवेशं महासमुद्रवद् अकृत-प्रज्ञैः।

**अजं** **साम्यं** **विशारदम्**। ईदृक् पदम् **अनानात्वं** नानात्व-वर्जितं **बुद्ध्वा** अवगम्य तद्भूताः सन्तः **नमस्कुर्मः**

तस्मै पदाय। अव्यवहार्यमपि व्यवहार-गोचरमापाद्य **यथाबलं** यथाशक्तीत्यर्थः।। ४.१०० ।।

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्द-भगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकर-भगवतः कृतौ माण्डूक्योपनिषत्कारिकाभाष्यं संपूर्णम्।।

ब्रह्म नमस्कारः

## अजमपि जनियोगं प्रापदैश्वर्ययोगात् अगति च गतिमत्तां प्रापदेकं ह्यनेकम्।

## विविधविषयधर्मग्राहिमुग्धेक्षणानां प्रणतभयविहन्तृ ब्रह्म यत्तन्नतोऽस्मि।। १

(यत्) अजमपि ऐश्वर्ययोगात् जनियोगं प्रापद्, अगति (अपि) गतिमत्तां च प्रापद्, एकम् (अपि) विविधविषयधर्मग्राहिमुग्धेक्षणानां अनेकम् हि (भवति) यत् प्रणतभयविहन्तृ तत् ब्रह्म नतोऽस्मि।। १

तत् ब्रह्म नतोऽस्मि। कीदृशं तद्ब्रह्म। लक्षणं एव उच्यते। ब्रह्मणः ।

**(यत्) अजमपि ऐश्वर्ययोगात् जनियोगं प्रापद्** अजोऽपि सन् अव्ययात्मा ..। ऐश्वर्यं नाम माया। मायासंबन्धात् जन्मसंबन्धं जीवजगद् ईश्वररूपेण जनियोगं प्रापत् प्राप्तवत्। आप् लुङ् - प्राप्नोत्।

एवम् **अगति (अपि) गतिमत्तां च प्रापद्** - अगति च तत् ऐश्वर्ययोगात् मायासंबन्धात् गतिपत्तां प्रापत्। गतिः अस्य अस्ति इति गतिमत्। तां गतिमत्ताम्। प्रापत्।

**एकम्** (अपि) **विविधविषयधर्मग्राहिमुग्धेक्षणानां अनेकम् हि** (भवति) - विविधविषयधर्मग्राहिमुग्धेक्षणानां जीवानाम्। अनेकम् हि (भवति)विषयाणां धर्माः विषयधर्माः विविधाः विषयधर्माः विविधविषयधर्माः। गृह्णाति पश्यति इति ग्राही। तेषाम् अनेकम् हि (भवति)

**यत् प्रणतभयविहन्तृ तत् ब्रह्म नतोऽस्मि।** प्रणतः प्रपन्नाः। तेषाम् भयं संसारभयं। विहन्तृ - नाशयितृ। धातृशब्दवत्।

गौडपादाचार्यनमस्कारः

**प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नोऽन्तरस्थम्**

**भूतान्यालोक्य मग्नान्यविरतजननग्राहघोरे समुद्रे।**

**कारुण्यादुद्दधारामृतमिदममरैर्दुर्लभं भूतहेतोः**

**यस्तं पूज्याभिपूज्यं परमगुरुममुं पादपातैर्नतोऽस्मि।। २**

अविरतजननग्राहघोरे समुद्रे मग्नानि भूतानि आलोक्य यः प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नः अन्तरस्थम् अमरैर्दुर्लभं इदम् अमृतम् भूतहेतोः कारुण्यादुद्दधार यस्तं पूज्याभिपूज्यं परमगुरुममुं पादपातैर्नतोऽस्मि।। २

पूज्याभिपूज्यं परमगुरुममुं अहं नतोऽस्मि। गुरुगोविन्दपादस्य गुरुः परमगुरुः। पादे पातः। पादयोः पातः वा। साष्टाङ्गनमस्कारैः इत्यर्थः।

सारः प्रथमम्। अयं सर्वाणि भूतानि सर्वान् मनुष्यान् संसारजलधौ निमग्नवान् अपश्यत्। सर्वे जीवाः अज्ञानात् संसार जलधौ  संसारसमुद्रे निमग्ना सन्ति। मर्त्यभयं सर्वेषां वर्त्तते एव। तत्र मर्त्यभयात् उद्धारणार्थं किमपेक्षितम्। अमृतं अपोक्षितम्। इदं अमृतं कथं लभ्यते । अमृतं समुद्रमथनेन लभ्यते। तस्मात् समुद्रमथनं कर्त्तुं इष्टवान् आचार्यः। तत्र कीदृशः समुद्रः स्वीकृतः। वेदसमुद्रः एव स्वीकृतवान्। तत्र वेदसमुद्रे मथनार्थं मथनदण्डः अपेक्षितः। तत्र पुराणेषु मन्थरपर्वतः एव दण्डत्वेन स्वीकृतः उपयुक्तः। तत्र वेदसमुद्रमथनार्थं कः दण्ढः उपयोक्तव्यः इति चेत् प्रज्ञा बुद्धिः एव मथनदण्डः। तं मथनदण्डं वेदसमुद्रस्य अन्तः स्थाप्य पुनः पुनः

मथित्वा तदमृतं उद्दधार। ऊर्ध्वं आहृतवान्। किमर्थं एवं सर्वं कष्टं अनुभूतम् आचार्येण। कारुण्यात्। अहेतुकदयया भूतहेतोः।

**अविरतजननग्राहघोरे समुद्रे मग्नानि भूतानि -** कीदृशं समुद्रम्। अविरतं निरन्तरम् सर्वदा। जननं जन्म। पुनः पुनः जन्म इत्यर्थः। तादृशजन्म एव ग्राहः । पुनः पुनः जन्माख्यैः ग्राहैः ग्राहघोरः । तादृशे समुद्रे भूतानि मग्नानि आलोक्य।

**प्रज्ञावैशाखवेधक्षुभितजलनिधेर्वेदनाम्नः अन्तरस्थम् -** वेदनाम्नः जलनिधेः अन्तरस्थम्। प्रज्ञावैशाखवेधक्षुभितजलनिधिः। वैशाखो नाम मथनदण्डः। मथ् ९ उ.भ मथनदण्डः नाम वैशाखः तस्य वेधः अन्तस्स्थापनम्। तेन क्षुभितम्। आलोडनम्। क्षुभितजलनिधिः। बुद्ध्याख्यमथनदण्डेन क्षुभितजलनिधिः वर्त्तते। तस्य समुद्रस्य नाम वेदः। तस्य अन्तरस्थम् अमृतम्। कीदृशम् अमृतम्। अमरैः दुर्लभम्। तेषाममृतं तु आपेक्षिकम् अमृतम्। देवैः अत्रापि विचिकित्सितम्। (कठ)।

तम् अमृतं भूतार्थं अज्ञानिजीवार्थं कारुण्याद् उद्दधार। उद् धृ

यः गौडपादः एवं कृतवान् तं .. अमुं पादपातैः नतः अस्मि।

**यत्प्रज्ञालोकभासा प्रतिहतिमगमत् स्वान्तमोहान्धकारो**

**मज्जोन्मज्जच्च घोरे ह्यसकृदुपजनोदन्वतित्रासने मे।**

**यत्पादावाश्रितानां श्रुतिशमविनयप्राप्तिरग्र्या ह्यमोघा**

**तत्पादौ पावनीयौ भवभयविनुदौ सर्वभावैर्नमस्ये।। ३**

यत्प्रज्ञालोकभासा घोरे त्रासने ह्यसकृदुपजनोदन्वति मज्जोन्मज्जच्च मे स्वान्तमोहान्धकारः प्रतिहतिमगमत्। यत्पादावाश्रितानां अग्र्या ह्यमोघा श्रुतिशमविनयप्राप्तिः (भवति) तत्पादौ पावनीयौ भवभयविनुदौ सर्वभावैर्नमस्ये।। ३

**तत्पादौ पावनीयौ भवभयविनुदौ** - तत्पादौ - गोविन्दभगवत्पादपादौ अतीवपावनौ। भवभयनुदौ - नुद् नुदति नाशयति। सुहृत्शब्दवत्। संसारभयस्य नाशकौ। सर्वभावैः सर्वप्रकारेण नमस्ये नमस्कारं करोमि।

**यत्प्रज्ञालोकभासा मे स्वान्तमोहान्धकारः प्रतिहतिमगमत् -** यस्य आचार्यस्य बुद्धिः प्रज्ञा आलोकः ज्योतिः तसय भासा कस्य अन्धकारः नाशम् अगमत्। मे। मम। कीदृशः मम। मज्जोन्मज्जच्च। मज्जतः उन्मज्जतः च मम अन्धकारः।

**ह्यसकृदुपजनोदन्वति घोरे त्रासने -** उदन्वान् समुद्रः। बहुवारं जन्म पुनः पुनः जन्म असकृत् जन्म एव समुद्रः। तस्मिन् त्रासने भयहेतोः घोरे समुद्रे मज्जतः उन्मज्जतः च मम अन्धकारः नासं अगमत्।

**यत्पादावाश्रितानां श्रुतिशमविनयप्राप्तिः अग्र्या ह्यमोघा (भवति)** - यस्य पादौ आश्रीतानां भक्तानां श्रुतिः श्रवणजन्यतज्ज्ञानं शमः विनयः च तेषां श्रुतिशमविनयानां प्राप्तिः अग्र्या श्रेष्ठा भवति अमोघा च सप्रयोजनं च।